गुड	gur	श्रेष्ठी	seth
इलीश	hilsa	शर्करा	sugar

GRAMMAR

As we know, all our major Indian languages abound in vocabulary directly drawn or derived from Sanskrit. It is amazing that we find many of them prevalent also in some foreign languages. Although a detailed study would be more revealing, a brief account only is presented here by way of illustration.

From the point of view of grammar, our regional languages differ among themselves in pronouns, indeclinables and suffixes added to nouns and verbs.

Pronouns

Sanskrit	*Regional Languages*
स[1] सा	si (Assamese)
	su (Kashmiri)
	se (Oriya, Bengali)
त्वम्	tum (Hindi, Urdu)
	tumi (Assamese, Bengali)
	tume (Oriya), tumhi (Marathi)
यः	jo (Punjabi, Hindi)
इदम्	idu (Tamil, Kannada, Malayalam)
	idi (Telugu)
तत्	that (English)
माम्	mammu (Telugu)
मे	me (Kashmiri)
त्वा	toi (French)
केन[2]	kena (Bengali), kina (Punjabi)
तेन	tina (Punjabi)
येन	jena (Bengali)

[1] In a sentence the word स carries विसर्ग when it is followed by a word beginning with अ

[2] Meaning "why", Monier-Williams, Sanskrit-English Dictionary, p. 309 .

The word अकस्मात्, used in Gujarati, Oriya, Bengali, Hindi, Malayalam, Kannada is derived from the word कस्मात्। The pronoun अहम् is found in the compound अहङ्कार (अहम्+कार) which is used in all the Indian languages. Similarly, मम is found in the word ममता। मम, तव are used by Oriya and Bengali poets even today.

Cases

Vocative Case, Singular Number

The vocatives of the अ-ending words like देव, पुत्र are used in all the regional languages as they are in Sanskrit. हरे, सीते, the vocatives of हरि and सीता, are known to almost all.

Nominative Case, Singular Number

Words like धनी, भगवान्, बुद्धिमान्, पिता, माता, माला, नदी are used in all the regional languages as they are in Sanskrit. The following words used in our languages are essentially Sanskrit but without the विसर्ग, e.g.,

Regional Languages	*Sanskrit*
बालक	बालकः
ऋषि, बुद्धि	ऋषिः, बुद्धिः
साधु	साधुः
वधू	वधूः

Accusative Case, Singular Number

Compound words like धनञ्जय, मृत्युञ्जय, अरिन्दम are used in almost all the regional languages. In these words accusative case in the singular number is found, e.g., धनं जयति इति धनञ्जयः, मृत्युं जयति इति मृत्युञ्जयः, अरिं दमयति इति अरिन्दमः।

Stem	*Accusative Case*
धन	धनम्
मृत्यु	मृत्युम्
अरि	अरिम्

Similarly, बालक – बालकम्, माला – मालाम्, बुद्धि – बुद्धिम्, नदी – नदीम्, साधु – साधुम्, वधू – वधूम् ।

The mantra **वन्दे मातरम्** is known to all of us. It illustrates the accusative case of the following ऋ-ending words in the singular number, e.g.,

Stem	*Accusative Case*
मातृ	मातरम्
पितृ	पितरम्
भ्रातृ	भ्रातरम्

Instrumental Case, Singular Number

Stem	*Sanskrit*	*Regional Languages*
कृपा	कृपया	कृपया (Hindi, Marathi)

शान्ति	शान्त्या	शान्तिया (Tamil)*
तृप्ति	तृप्त्या	तिरुप्तिया (Tamil)*
वचस्	वचसा	वचसा (Punjabi)
कर्मन्	कर्मणा	करमणा (Punjabi)

शान्ति + आ = शान्त्या, वचस् + आ = वचसा, कर्मन् + आ = कर्मणा, Similarly, धनिन् + आ = धनिना, भगवत् + आ = भगवता, नदी + आ = नद्या, धेनु + आ = धेन्वा, वधू + आ = वध्वा ।

Dative Case, Singular Number

The mantra ॐ नमः शिवाय is known to all of us. It exemplifies the dative case of the अ-ending words in the singular number, e.g.,

Stem	*Dative Case*
शिव	शिवाय
राम	रामाय
कृष्ण	कृष्णाय

Ablative Case, Singular Number

The following words in the ablative case are used in many regional languages, e.g.,

हठात् (Oriya, Assamese, Bengali, Hindi, Kannada)
साक्षात् (Bengali, Oriya, Hindi, Telugu, Kannada)

* These are spoken forms.

पश्चात्	(Hindi)
अर्थात्	(Oriya, Hindi, Marathi)
दैवात्	(Oriya, Bengali)

Genitive Case, Singular Number

Sanskrit	*English*
रामस्य	Rama's
द्वारस्य	door's

Locative Case, Singular Number

Words in the locative case are used in the following Indian languages as they are in Sanskrit –

देशे, ग्रामे	(Oriya, Bengali)
पदे पदे	(Kannada, Bengali, Oriya)
मध्ये	(Kannada, Oriya, Bengali)

देश + इ = देशे, पद + इ = पदे, मध्य + इ = मध्ये । Similarly, धनिन् + इ = धनिनि, भगवत् + इ = भगवति, सरस् + इ = सरसि।

Conjugations

Present Tense

सः अस्ति he is. अस्ति is found in the word अस्तित्व which is used in many Indian languages. नास्ति (न+अस्ति) is found in the word नास्तिक which is used in all the Indian languages.

अस्ति (Sanskrit), **est** (French), **ist** (German), **yest** (Russian).

अहम् अस्मि I am. अस्मि is found in the word अस्मिता which is used in many Indian languages.

आमि of Bengali, meaning I, is found in the conjugation of verbs, e.g., पठ्+आमि=पठामि, खाद्+आमि=खादामि, लिख्+आमि=लिखामि। अहं खादामि I eat or I am eating.

बुद्धं शरणं गच्छामि, सङ्घं शरणं गच्छामि – we are familiar with these two sentences also.

त्वम् असि you are.

असि (Sanskrit), **yesi** (Russian), **es** (French).

Imperative Mood

त्वं हस you laugh.

हस (Sanskrit). हस (Oriya, Gujarati, Hindi, Punjabi).

अस्तु (अस्+तु) is found in the compound तथास्तु (let it be so) which is known to most Indians. Similarly, हस+तु=हसतु, लिख+तु=लिखतु इत्यादि। स हसतु let him laugh. स लिखतु let him write. स गच्छतु let him go.

Potential Mood

त्वं चलेः you should walk.

चलेः (Sanskrit), चलें (Punjabi).

Indeclinables

The following indeclinables of Sanskrit are used in Oriya. Many of them are used in other regional languages also.

अति	अथवा	अन्यत्र	एकत्र	एकदा
क्रमशः	दिवा	नोचेत्	पश्चात्	पृथक्
प्रति	प्रायः	मिथ्या	यदि	यथा
युगपत्	विना	विशेषतः	वृथा	सदा
सर्वत्र	सर्वदा	सह	सहसा	साधारणतः
सामान्यतः	स्वयम्	स्वतः		

The following indeclinables are used in compounds in almost all the regional languages.

Indeclinable	*Compound*	*Indeclinable*	*Compound*
अन्तर्	अन्तर्धान	अधः	अधोगति
इतः	इतस्ततः	इति	इत्यादि
चिरम्	चिरञ्जीवी	तथा	तथापि
तु	किन्तु, परन्तु	धिक्	धिक्कार
नमः	नमस्कारः	पुनः	पुनर्जन्म
पुरः	पुरोहित	प्रातः	प्रातःकाल
बहिः	बहिष्कार	वा	किंवा, अथवा
स्वर्	स्वर्ग	सायम्	सायङ्काल

Let us have a look at a few other indeclinables.

Indeclinable	*Meaning*	*Regional languages that use them*
अन्तर्	inside	अन्दर् (Hindi, Urdu, Sindhi, Gujarati, Kashmiri)[1]
अपेक्षया	than	अपेक्षा (Oriya, Bengali)
अवश्यम्	of course	अवश्य (Marathi, Bengali)
आम्	yes	आम् आम् (Tamil)
इदानीम्	now	(Bengali)
उपरि	upwards	उपरे (Oriya), उप्पर (Punjabi)
एवम्	thus	एव (Punjabi)
कदा	when	कदों (Punjabi)
किम्	what	कि (Assamese, Oriya)
किञ्चित्	a little	(Oriya, Marathi)
क्वचित्	somewhere	(Oriya, Bengali, Gujarati)
तत्रैव	in the same place	(Oriya)
तदा	then	तदों (Punjabi)
द्वारा	by	(Oriya, Bengali, Marathi)
न	no	(Sindhi, Kashmiri)
नहि	not indeed	(Punjabi, Hindi)
नीचैः	downwards	नीचे (Hindi, Urdu, Bengali)
परम्	afterwards	परे (Oriya, Bengali)
पुनः	again	(Hindi, Kannada)

[1] Illustrative, not exhaustive. अन्तर् is used in other Indian languages also. It applies to all the words that follow in this list.

पूर्वम्	before	पूर्वे (Oriya, Bengali)
पर्यन्तम्	till	पर्यन्त (Bengali, Gujarati)
प्रतिदिनम्	everyday	प्रतिदिन (Oriya, Bengali)
बहु	a lot	(Gujarati)
बहिर्	out	बाहिर (Sindhi), बाहर (Hindi)
मात्रम्	only	(Tamil, Malayalam)
वारंवारम्	often	वारंवार (Gujarati, Marathi)
शीघ्रम्	soon	(Tamil, Telugu)
सदैव	always	(Gujarati)
सम्प्रति	now	(Bengali)
साम्प्रतम्	now	साम्प्रत (Marathi)
सुष्ठु	all right	सुठ[1] (Punjabi)

Indeclinables in European Languages

उपरि	up, upper	(English)
कदा	when	kadā (Russian, spoken form)
तदा	then	tadā (Russian, spoken form)
न, नो	no	(English)
नक्तम्	night	night (English), nuit (French) nacht (German)
स्वयम्	oneself	soi-même (French)
ह्यः	yesterday	hier (French)

[1] डॉ. श्यामदेव पाराशर, *संस्कृत तथा पञ्जाबी के सम्बन्ध*, १९९०, पृ. २२२

Even the grammatical part discussed above shows the universal nature of Sanskrit. This cannot be found in our regional languages. A simple experiment will show where our regional languages stand. If we try to find a single word in any of the regional languages which is peculiar to it and at the same time intelligible to people of other languages, we shall find it impossible, except when the word is derived from or has its origin in Sanskrit. Hence Sanskrit is the only language which can become the common link language of India.

Sanskrit has been artificially made difficult. It is difficult because of the wrong method of teaching. How can we say that Sanskrit, which for centuries was a living spoken language, is difficult and our languages are simpler when we see them differ from district to district?

A language becomes difficult when it is not spoken. But now-a-days we see that people learn to speak Sanskrit after attending 10-days' Spoken Sanskrit Course. The villagers of Muttur in Shimoga district of Karnataka speak Sanskrit in their daily life. In the Kindergarten of Sri Aurobindo International Centre of Education, Pondicherry, Sanskrit is taught to 3-year-old children by the direct method. This being so, how can we say that Sanskrit is a difficult language and cannot be used for day-to-day communication?

INDECLINABLES

The indeclinables do not change their forms. They differ from language to language. A few among the following indeclinables are used in some regional languages.

अत्र

अहम् अत्र कार्यं करोमि। अत्र आगच्छ। अत्र उपविश।

I work here. Come here. Sit here.

कुत्र

कुत्र सः ? सः कुत्र कार्यं करोति ? कुत्र भवतः निवासः ? भवान् कुत्र निवसति ? भवान् कुत्र भोजनं करोति ? भवान् कुत्र गच्छति ?

Where is he? Where does he work? Where is your residence? Where do you reside? Where do you take your meals? Where are you going?

यत्र तत्र

यत्र धूमः तत्र वह्निः[1]। यत्र भक्तः तत्र भगवान्। यत्र शान्तिः तत्र सुखम्। यत्र द्वेषः तत्र क्लेशः। यत्र अज्ञानं तत्र दुःखम्। यत्र वृक्षः तत्र छाया। यत्र पुष्पम् अस्ति तत्र भ्रमरः गच्छति। यत्र योगेश्वरः कृष्णः, यत्र धनुर्धरः पार्थः, तत्र एव विजयः।

अन्यत्र

सः अत्र नास्ति। त्वम् अन्यत्र पश्य। सः अत्र निवसति किन्तु अन्यत्र भोजनं करोति।

He is not here. You see elsewhere. He resides here but takes his meals elsewhere.

[1] Where there is smoke, there is fire.

सर्वत्र everywhere

वायुः/आकाशः/भगवान् सर्वत्र अस्ति।

अत्र तत्र च सर्वत्र वर्तते परमेश्वरः।
एकत्रान्यत्र तत् स्थानं कुत्रास्ति यत्र नास्ति सः।।

परमेश्वरः (भगवान्) अत्र, तत्र, सर्वत्र वर्तते (अस्ति)। सः एकत्र अस्ति, अन्यत्र अपि अस्ति। तत् स्थानं कुत्र अस्ति यत्र सः नास्ति ?

एव (for emphasis or exclusiveness)

त्वम् एव दोषी/अपराधी। आरोग्यम् एव परमसौभाग्यम्। एकमेवाद्वितीयं ब्रह्म। एकम् एव अद्वितीयं ब्रह्म। सत्यमेव जयते नानृतम्। सत्यम् एव जयते (जयति) न अनृतम् (न असत्यम्/न मिथ्या।) स एव जानाति। इत्थम् एव भवति।

च and

रामः, श्यामः गोविन्दश्च संस्कृतं पठन्ति। रामश्च श्यामश्च गोविन्दश्च संस्कृतं पठन्ति।

अद्य today

अद्य कः वारः ? अद्य सोमवारः। श्वः मङ्गलवारः। परश्वः बुधवारः। ह्यः रविवारः आसीत्। परोह्यः शनिवारः आसीत्। परोह्यः मम जन्मदिनम् आसीत्। अद्य त्वं किं पठितुम् इच्छसि ? श्वः त्वं किं करिष्यसि ?

अपि also

त्वं छात्रः। अहम् अपि छात्रः। त्वं युवकः। अहम् अपि युवकः। सा न वृद्धा। एषा अपि न वृद्धा। सः पठति। तस्य भ्राता अपि पठति। सः संस्कृतं जानाति। तस्य भ्राता अपि संस्कृतं जानाति।

(प्रश्ने) अपि त्वं स्वस्थः[1] ? अपि सर्वं कुशलम् ? अपि सः अस्य विद्यालयस्य छात्रः ? अपि सा तव भगिनी ?

किमर्थम् why

सा किमर्थं न वदति ? सा किमर्थं मुखं न उद्घाटयति ? सा किमर्थं मौनं धारयति ? त्वं किमर्थं संस्कृतं पठसि ? भवान् किमर्थम् आश्रमे वसति ? त्वं किमर्थं तत्र गच्छसि ?

यथा तथा

यथा पिता तथा पुत्रः[2] । यथा बीजं तथाङ्कुरः। यथा दृष्टिः तथा सृष्टिः। यथा पूर्वं तथा परम्। यथा वृक्षः तथा फलम्। यथेच्छसि (यथा इच्छसि) तथा कुरु। यथा अयं मम बन्धुः तथा त्वम् अपि। यथा गुरुः कथयति तथा शिष्यः करोति। यथा मतिः तथा गतिः।

यदा तदा

यदा त्वं वदसि तदा अहं न वदामि। यदा अहं वदामि तदा त्वं न वद। यदा वसन्तकालः भवति तदा कोकिलः कूजति।

कदा (कस्मिन् समये) when

त्वं प्रातः (प्रभाते) कदा उत्तिष्ठसि ? त्वं प्रातः कदा आश्रमं गच्छसि ?

कुतः (कस्मात् कारणात्) why

कुतः जन्म ? कुतः मृत्युः ? कुतः सः धनिकः ? कुतः एषः दरिद्रः ? त्वं कुतः प्रतिदिनं विलम्बेन आगच्छसि ?

[1] (Hindi) क्या तुम् स्वस्थ हो ? अपि – क्या ।

[2] Like father, like son.

कथम् how

भोजनं कथम् अस्ति ? अद्यतनं चलचित्रं कथम् अस्ति ? कथं मारात्मके त्वयि विश्वासः कर्तव्यः ? कथं न बोधसि – तव बुद्धिः अस्ति न वा ? कथम् एतत् कर्तव्यम् (करणीयम्) ?

केवलम् only

अहं केवलं संस्कृतं पाठयामि। सा केवलं गणितं पाठयति। एषः प्रभाते केवलं चायं पिबति, अन्यत् किमपि न खादति। अहं न केवलं शृणोमि, स्मरामि अपि।

इति (completing the quotation)

संस्कृतं राष्ट्रभाषा भवेत् इति श्रीमाता कथयति[1] । संस्कृतं पठनीयम् इति पिता वदति। सत्यं वद, धर्मं चर इति आचार्यः उपदिशति।

समाप्तिसूचकम्

इति प्रथमोऽध्यायः (प्रथमः अध्यायः समाप्तः इति अर्थः)।
इति वार्ताः (वार्ताः समाप्ताः इति अर्थः)।
इति प्रथमोऽङ्कः। इति रघुवंशे प्रथमः सर्गः।
इति मनुः thus says Manu (एतत् मनुः कथयति)।
इति वादरायणः (एतत् वादरायणः कथयति)।
स पण्डितः इति पूज्यः, कृपणः इति निन्द्यः। (सः पण्डितः, अतः पूज्यः; सः कृपणः, अतः निन्द्यः)।

[1] (Hindi) संस्कृत राष्ट्रभाषा हो, ऐसा माताजीने कहा है। इति – ऐसा ।

इतः from this place

इतः किञ्चिद् दूरे विद्यालयः अस्ति। इतः भवान् कदा प्रस्थानं करिष्यति ? इतः भवान् कुत्र गमिष्यति ? इतः पूर्वं (before this) भवान् कुत्र आसीत् ? इतः परं भवान् कुत्र स्थास्यति ? इतः गच्छतु (please go this way). त्वम् इतः गच्छ, सः ततः आगच्छतु।

इव like

सः कुम्भकर्ण इव स्वपिति, बकासुर इव खादति, घटोत्कच इव युद्धं करोति, कर्ण इव दानं करोति। दर्पः सर्प इव (सर्पवत्) आघातं करोति। एषः भीम इव (भीमवत्) चलति। सा कोकिल इव गायति।

उच्चैः

(उपरि) आकाशः उच्चैः अस्ति, भूमिः नीचैः। श्येनः उच्चैः उड्डयते। (उच्चस्वरेण) उच्चैः गाय। वयं श्रोतुं न शक्नुमः। उच्चैः न हस। उच्चैः न वद। उच्चैः आलापं मा कुरु। पाशबद्धः सिंहः उच्चैः गर्जति।

वा or

कः दोषी – अहं वा त्वं वा ? कः दोषी – अहम् अथवा त्वम् ? कः साधुः – स वा एष वा ? कः साधुः – सः अथवा एषः ?

सहसा all of a sudden

सम्यक् विचारय। सहसा किमपि न कुरु।

हि indeed

जनो हि मननशीलः। मूढो हि गूढं न जानाति। अध्यवसायिनः न हि किमपि असाध्यम्। न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।

यतो हि because

अहं संस्कृतं वदामि यतो हि मम माता संस्कृतं वदति। सा न लिखति यतो हि तस्याः लेखनी नास्ति।

अतः hence

मम माता संस्कृतं वदति। अतः अहमपि वदामि।

कथमपि somehow

कथमपि मया विजयः प्राप्तव्यः। कथमपि मया संस्कृतं शिक्षणीयम्।

यद्यपि although

यद्यपि स दरिद्रः तथापि स सुखी। यद्यपि स पण्डितः तथापि स संस्कृतं न वदति। यद्यपि बहु नाधीषे (न पठसि) तथापि पठ पुत्र व्याकरणम्। यद्यपि अहं बहु खादामि तथापि स्थूलः न भवामि !

यदि ...तर्हि if ... then

यदि धनम् अस्ति तर्हि दानं कुरु। यदि पापं न कृतं तर्हि परितापं मा कुरु। यदि विपरीतो विधिः तर्हि हस्तगतोऽपि निधिः लुप्यति।

प्रातः, सायम्

प्रातः सूर्यः उदयति, सायम् अस्तं गच्छति।

यावत् तावत्

समुद्रे यावत् जलम् अस्ति कूपे तावत् नास्ति। सः यावत् जानाति तावत् न प्रकाशयति। त्वं यावत् इच्छसि तावत् गृहाण। यावत् श्वासाः तावत् आशाः। तावच्च शोभते मूर्खो यावत् किञ्चित् न भाषते। यावदिन्द्रियचापल्यं तावत् तत्त्वकथा कुतः।

वरम् better, rather

रणे मरणं वरं न तु पलायनम्। वरम् अद्य कपोतः श्वः मयूरात्। वरं मृत्युः न पुनर् अपमानः। दारिद्र्यात् मरणमेव वरम्।

विना without

यत्नं विना रत्नं न लभ्यते। सन्तोषं विना शान्तिर्न लभ्यते। भक्तिं विना भगवान् न लभ्यते। जलं विना मत्स्यः न जीवति। उपनेत्रं विना अहं द्रष्टुं न शक्नोमि। बुद्धिं विना बलं व्यर्थम्। विद्यां विना जीवनं वृथा। भोजनं विना भजनं किं सम्भवति ?

प्रति to, towards

दीनं प्रति दयां कुरु। मां प्रति सदयः/सदया भव।

चेत् if, in case

पठितुं न इच्छसि चेत्, गृहं गच्छ। (यदि त्वं पठितुं न इच्छसि तर्हि गृहं गच्छ।) राजनीतिम् इच्छसि चेत् आश्रमं त्यक्त्वा अन्यत्र गच्छ। अध्यात्मजीवनम् इच्छसि चेत् अन्यत्र न गत्वा आश्रमे तिष्ठ। गन्तुम् इच्छसि चेत्, गच्छ। पठितुम् इच्छसि चेत्, पठ।

तूष्णीम् (मौनेन)

तूष्णीं तिष्ठ, किमपि न वद।

नूनम् (निश्चयेन, अवश्यम्) certainly, surely

नूनं स चोरः। सत्कर्मणः फलं नूनं प्राप्यते। अहं नूनं तत्र गमिष्यामि। त्वया यद् उक्तं नूनं तत् सत्यम्। हरिः नूनं त्वां रक्षिष्यति।

नो चेत् (अन्यथा) else, otherwise

देहि मे पुस्तकम्, नो चेत् पित्रे निवेदयिष्यामि। मम आज्ञां पालय, नो चेत् दण्डं प्राप्स्यसि। मित्र, अन्यथा न मन्तव्यम् (अन्यथा न चिन्तय)। सत्यं वद, नो चेत् ताडयिष्यामि।

पुरा (पुराकाले) long ago

पुरा दशरथः नाम राजा आसीत्। पुरा संस्कृतं लोकभाषा आसीत्।

मा (निषेधे)

दुष्टतां मा कुरु। असत्यं मा वद। मा कुरु धन-जन-यौवन-गर्वम्।

मिथ्या lie

अहं मिथ्या न वदामि। त्वम् अपि मिथ्या न वद। ब्रह्म सत्यं जगन्मिथ्या इति शङ्कराचार्यः अकथयत्।

क्व (कुत्र)

क्व जलबिन्दुः क्व सुधासिन्धुः। क्व रामचन्द्रः क्व रामनापितः। क्व त्वं क्व चाहम्। क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।

खलु indeed

स खलु भाग्यवान्। अमृतं खलु गुरुवचनम्। वन्द्याः खलु गुरवः। दास्यं खलु कस्य आस्यं (मुखम्) न नमयति ? ज्ञानं खलु आचरितम् एव हितं सम्पादयति। शरीरमाद्यं खलु धर्मसाधनम्।

चित्, चन

सखे ! कश्चित्/कश्चन (कोऽपि) त्वाम् आह्वयति। कस्मिंश्चित्/कस्मिंश्चन (कस्मिन्नपि) अरण्ये कोऽपि भयङ्करः सिंहः निवसति स्म। कर्म न कुर्वन् कश्चित्/कश्चन क्षणमपि स्थातुं न शक्नोति।

तु

त्वं तु पण्डितवत् वदसि। एतत् तु मया न कृतम्।

अथ

(शुभारम्भे[1]) अथ प्रथमोऽध्यायः। अथ अव्ययानां व्यवहारः।
(अनन्तरम् afterwards) अथ शशकस्य वारः आगतः।
(यदि) अथ पाठं न पठसि, दण्डं प्राप्स्यसि।

अद्यत्वे now-a-days

अद्यत्वे बहवः जनाः आश्रमम् आगच्छन्ति। अद्यत्वे जनानां दुःखम् अधिकम् अस्ति। अद्यत्वे जनाः संस्कृतं वदितुम् इच्छन्ति।

अलम् enough, no more

अलम् अतिविस्तरेण (पर्याप्तम्, अधिकविस्तारं मा कुरु)। अलम् अतिव्याख्यया (पर्याप्तम्, अधिकव्याख्यां मा कुरु)। अलं दुःखेन। अलम् आडम्बरेण। अलं रोदनेन। अलं लोभेन/चापलेन/कोलाहलेन/अतिजल्पनेन/उपदेशेन/मिथ्याभाषणेन ।

सह

केनापि सह विरोधः न कर्तव्यः। केनापि सह कलहः न कर्तव्यः। पिता पुत्रेण सह आपणं गच्छति। सुरेशः निजभगिन्या सह संस्कृते आलपति। रामः रावणेन सह युद्धम् अकरोत्।

पुनः again

पुनः अत्र आगच्छ। पुनः एतत् मा कुरु। गच्छतु भवान्, पुनर्दर्शनाय।

[1] अथ is used for an auspicious beginning.

शनैः slowly, little by little

शनैः गच्छ। शनैः पन्थाः शनैः कन्था शनैः पर्वतलङ्घनम्।

तावत् (प्रथमम्)

आर्ये, इतस्तावत् आगच्छतु। आर्य, अत्र आगम्यताम् (आगच्छतु)।

आरभ्य

अद्य आरभ्य पञ्च दिनानि यावत् अत्र संस्कृतवर्गः भविष्यति। सोमवारात् आरभ्य शनिवारपर्यन्तं (शनिवारं यावत्) अत्र संस्कृतवर्गः भविष्यति। There will be a Sanskrit class here from Monday till Saturday. ह्यः आरभ्य अहम् अत्र प्रातः आगच्छामि।

शीघ्रम्

शीघ्रं चल। शीघ्रं कथय। शीघ्रं धाव। शीघ्रम् आगच्छ।

वामतः, दक्षिणतः, पुरतः, पृष्ठतः

त्वं मध्ये असि। तव वामतः/दक्षिणतः/पुरतः/पृष्ठतः कः अस्ति ?

येन केन प्रकारेण (कथञ्चित्, कथमपि) anyhow

येन केन प्रकारेण इदं कार्यं सम्पादनीयम्/करणीयम्। येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत्।

लीलया (अनायासेन, अनायासम्) easily

अहं लीलया एतत् कर्तुं शक्नोमि। I can do this easily.

प्रायः, प्रायेण generally

स्त्रियः प्रायः कोमलहृदयाः। प्रायः प्रतिवर्षं सः अत्र आगच्छति। धनी प्रायेण अहङ्कारी। प्रायेण हि मनुष्याणां बुद्धिः कर्मानुसारिणी।

अद्य प्रभृति, अद्यारभ्य from today

अद्य प्रभृति स ते समीपम् आगमिष्यति। अद्य प्रभृति अस्माकं छुट्टिः।
अद्य प्रभृति अहं तुभ्यम् एकैकं पुस्तकम् उपहरिष्यामि।

अतीव, भृशम् very much

सः अतीव दुःखितः। सा भृशं कुपिता। एषः अतीव प्रसन्नः।

किं पुनः not to speak of

मूर्खोऽपि न निन्दनीयः, किं पुनः विद्वान्।

कुत्रापि, कुत्रचित्, क्वचित् somewhere

अहं त्वां कुत्रापि दृष्टवान्। अहं त्वां कुत्रापि दृष्टवती।
I have seen you somewhere.

अचिरम् soon

अचिरं तव कामना पूर्णा भविष्यति। अचिरं त्वं साफल्यं प्राप्स्यसि।
अचिरं ते मनोरथाः सिद्धिं यास्यन्ति। अचिरं तव वारः आगमिष्यति।

पुरतः in front

आश्रमस्य पुरतः (सम्मुखे) विद्यालयः अस्ति। अस्माकं विद्यालयस्य पुरतः मन्दिरम् अस्ति। अस्माकं गृहस्य पुरतः/पृष्ठतः/वामतः/दक्षिणतः राजमार्गः अस्ति। नीरस-तरुवरः पुरतो भाति। नीरस-तरुरिह विलसति पुरतः। यं यं पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः (वचनम्)।

उपरि above, **अधः** below

उपरि आकाशः, अधः भूमिः। वृक्षस्य अधः (अधस्तात्) बालकाः खेलन्ति। अधः पश्यसि किं बाले पतितं तव किं भुवि ?

इत्थम्, एवम् thus

इत्थं मा कुरु। एवमस्तु। एवं सा अवदत्। स इत्थं खादति।

एकशः, एकैकशः one by one

एकैकशः गच्छत। एकशः गम्यताम्। एकैकशः आगच्छत।

भूयो भूयः again and again

भूयो भूयोऽभिनन्दनम्। भूयो भूयोऽभिवर्धताम्।

अधुना, इदानीम्, सम्प्रति, साम्प्रतम् now, now-a-days

अधुना किं कर्तव्यम् ? इदानीं सर्वाणि वस्तूनि महार्घाणि।

मिथः (परस्परम्)

शिक्षकाः मिथः आलपन्ति। मिथः कलहः न कर्तव्यः।

कृते (अर्थे) for, for the sake of

तस्य कृते अहं सर्वं करोमि किन्तु मम कृते सः किमपि न करोति।
अहं तव कृते एतत् करोमि। सः देशस्य कृते जीवति।

किमु what use

निर्वाणदीपे किमु तैलदानम् ?

What is the use of giving oil in a lamp which has gone out ?

LET US SPEAK SANSKRIT

Make sentences using the following, e.g.,

त्वं पठ[1] । त्वं रामायणं पठ। त्वं रामायणं शुद्धं पठ। त्वं रामायणम् अशुद्धं न पठ। त्वं नित्यं रामायणं पठ। त्वं रामायणम् अधिकं पठ। त्वं महाभारतम् अल्पं पठ।

त्वं पठ you read.

रामायणम्, महाभारतम्, गीताम्, शुद्धम्, अशुद्धम्, न, अधिकम्, किञ्चित्, नित्यम्, अद्य, श्वः tomorrow.

त्वं खाद you eat.

फलम्, द्राक्षाम्, विषम्, न, अधुना, परम्।

त्वं कुरु you do.

विश्वासम्, दानम्, पापम्, न, गीतापाठम्, शब्दम्, भयम्, गर्वम्, दुःखम्, सन्देहम्, पूजाम्, स्वागतम्, दयाम्, कृपाम्, क्षमाम्, व्यायामम्, व्यापारम्, अभ्यासम्, कार्यम्।

त्वं देहि you give.

भिक्षाम्, रक्तम्, धनम्, दानम्, उत्तरम्, पूर्णम्, अर्धम्, सर्वम्।

त्वं पश्य you see.

अत्र, तत्र, दूरम्, आकाशम्, चन्द्रम्, नाटकम्, माम् to me.

[1] This sentence is in the imperative mood.

त्वं भव you be.

आयुष्मान्, आयुष्मती, सुखी, सुखिनी, बुद्धिशाली, बुद्धिशालिनी, वीरः, वीरा, देशभक्तः, शान्तः, अशान्तः, असन्तुष्टः, सदा, कदापि न।

त्वं वद you speak.

सत्यम्, असत्यम्, न्यायम्, अन्यायम्, न।

त्वं धाव you run.

वेगेन, मन्दं मन्दम्।

त्वम् आगच्छ you come.

अत्र, इतः, ततः, अभ्यन्तरम्, शीघ्रम्, सावधानम्, मन्दं मन्दम्, अद्य, श्वः, परश्वः, न, अधुना, परम्, प्रभाते (प्रातः), सन्ध्याकाले (सायम्), मध्याह्ने, अपराह्णे, सोमवारे, सोमवारे न, मङ्गलवारे, एकवादने, द्वि/त्रि/चतुर्/पञ्च/षड्वादने।

एकवादनात् परम्, एकवादनात् पूर्वं न, सोमवारात् परम्, सोमवारात् पूर्वं न, सप्ताहात्/मासात्/वर्षात् परम्, दिनद्वयात् परम्, त्रि/चतुर्/पञ्च/षड्दिनेभ्यः परम्, अस्मिन् सप्ताहे/मासे/वर्षे न, आगामि-सप्ताहे/मासे/वर्षे।

What is the time ?

अधुना कः समयः ? अधुना का वेला ? अधुना कतिवादनम् ?

एक-द्वि-त्रि-चतुर्-पञ्च-षड्-सप्त-अष्ट-नव-दश-एकादश-द्वादश-वादनम्।

प्रातः सप्तवादनम्	7 A.M.	सायं सप्तवादनम्	7 P.M.
सार्ध-सप्तवादनम्	7.30	सपाद-सप्तवादनम्	7.15

पादोन-सप्तवादनम्	6.45	पञ्चाधिक-सप्तवादनम्	7.05
पञ्चोन-सप्तवादनम्	6.55	दशाधिक-सप्तवादनम्	7.10
दशोन-सप्तवादनम्	6.50	विंशत्यधिक-सप्तवादनम्	7.20
विंशत्यून-सप्तवादनम्	6.40	पञ्चविंशत्यधिक-सप्तवादनम्	7.25
पञ्चविंशत्यून-सप्तवादनम्	6.35	दिवा/रात्रौ दशवादनम्	10.00

संस्कृते वद Speak in Sanskrit:

5.05, 7.10, 9.15, 10.20, 12.25, 11.30, 6.35, 9.40, 9.45, 4.45, 3.50, 2.55, 1 A.M., 2 P.M.

GREETINGS

सुप्रभातम्। सुदिनम्। सुसायम्। सुरात्रिः।
नमस्कारः। नमस्ते। स्वस्ति।
स्वागतं ते/स्वागतं तव। स्वागतं भवतः/भवत्याः।

अपि कुशलम् ?
Are you all right?

आम्, सर्वं कुशलम्।
Yes, everything is all right.

का वार्ता/कः समाचारः/किं वृत्तम् ?
What is the news?

अन्तिम-समाचारः कः ?
What is the latest news?

किं भोः, कथमसि ?
Hello, how are you?

आर्य, भवान् कथमस्ति ? आर्ये, भवती कथमस्ति ?
How are you Sir? How are you Madam?

तव/भवतः/भवत्याः भ्राता कथमस्ति ?
How is your brother?

शुभं जन्मदिनम्।
Happy birthday.

बहुशः धन्यवादाः।
Thanks a lot.



पश्य, त्वदर्थं किमपि विशेषम् आनीतम्।
See, I have brought something special for you.

एवम् ?
Is it so/Really?

आम्।
Yes.

महान् अयं प्रसादः/महान् अयम् अनुग्रहः।
This is a great favour.

स्वस्ति तेऽस्तु। साधयामि।
May everything be well with you. I am going.

आशासे, तव सर्वं कुशलम्।
I hope, you are doing well.

शुभं नववर्षम्।
Happy New Year.

कृपया आसनं गृह्णातु/अलङ्करोतु। आस्यताम्।
Please take your seat.

उपकृतोऽस्मि/उपकृतास्मि आगमनेन।
How nice of you to have come!

विजयलाभे अभिनन्दनम्।
Congratulations on your victory.

परीक्षायां साफल्याय हार्दिक-शुभेच्छाः।
Best wishes for your success in the examination.

वैवाहिक-जीवनं सुखमयं भूयात्/दाम्पत्यजीवनं शुभं भूयात्।
Wish you a happy married life.

शतं जीव शरदः वर्धमानः/वर्धमाना।
Live a hundred years and prosper.

आरोग्यं त्वरितं भूयात्।
Wish you a speedy recovery.

पुत्रो जातः। पुत्री जाता। कुशलम्।
A son is born. A daughter is born. All well.

राजीवेन प्रथमश्रेणी प्राप्ता। रुक्मिणी उत्तीर्णा।
Rajeev secured first class. Rukmini passed.

कविताया: विवाहः चैत्र-प्रथमे। शीघ्रम् आगच्छ/आगच्छतु/आगम्यताम्।
Kavita's marriage is on the first of Chaitra. Come soon.

संस्कृत-शिक्षक-शिविरं जून्-पञ्चदशे प्रातः अष्टवादने पुदुच्चेर्यां श्रीअरविन्द-सोसायटी-कार्यालये। आगम्यताम्।
Sanskrit Teachers' Camp on June 15, at 8 A.M. in Sri Aurobindo Society Office, Pondicherry. Do come.

शिवास्ते पन्थानः। यात्रा ते सुखदा भूयात्।
Wish you a pleasant journey.

गच्छ बन्धो, अभीष्टसिद्धिरस्तु। गम्यताम् इष्टसिद्धये।
Go dear, may your wish be fulfilled.

भव नित्यं जितेन्द्रियः/जितेन्द्रिया।
Be always the master of your senses.

सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः।
May your fame be everlasting like the Sun, the Moon, the Himalayas, the Ocean.

चिरं जीव।
May you live long.

भद्रं ते। मङ्गलं ते।
May the good be with you. May it be auspicious for you.

धन्योऽस्मि। अनुगृहीतोऽस्मि। कृतकृत्योऽस्मि। (m.)
धन्यास्मि। अनुगृहीतास्मि। कृतकृत्यास्मि। (f.)
I am blessed. I am favoured. I am fulfilled.

DO'S

एतत् अधुनैव कुरु।
Do this now.

एतत् तत्र कुरु। एतत् अत्र कुरु।
Do it there. Do it here.

सर्वेषाम् उपकारं कुरु/सर्वान् उपकुरु।
Do good to everyone.

अत्र तिष्ठ। तत्र तिष्ठ।
Wait here. Wait there.

क्षणं तिष्ठ।
Wait a moment.

तूष्णीं तिष्ठ।
Keep quiet.

तूष्णीम् !
Quiet !

मुखं संवर !
Shut up !

अत्र विश्रामं कुरु।
Take rest here.

सुखी भव। सुखिनी भव।
Be happy.

धैर्यं धारय।
Have patience/take courage.

वेलां कथय।
Tell me the time.

कुक्कुरं बधान।
Tie up the dog.

केशान् सम्यक् प्रसाधय।
Comb your hair properly.

केशान् कर्तय/कल्पय।
Have a haircut.

मह्यं किञ्चित् चायं कुरु।
Make a cup of tea for me.

प्रातः भ्रमणं कुरु।
Take a walk in the morning.

मम चाये सितां/शर्करां किञ्चित् अधिकं देहि।
Put a little more sugar in my tea.

मम द्विचक्रं पश्य/सम्भालय।
Keep an eye on my cycle.

आपणं गच्छ।
Go to the market.

शाकम् आनय।
Bring vegetables.

भोजनम् आनय।
Bring the food.

चायपानं कुरु।
Have some tea.

इदं तालकय।
Lock it.

उच्चैर् वद।
Speak loudly.

मन्दं वद।
Speak slowly.

मृदु वद।
Speak softly.

समये/समयेन आगच्छ।
Come in time.

तं/तां मार्गं दर्शय।
Show him/her the way.

सम्भारं बधान।
Pack up the luggage.

स्थालीं धावय/क्षालय।
Wash the dish.

इतः आगच्छ।
Come this way.

इमं पार्श्वम् आगच्छ।
Come this side.

अन्यपार्श्वं गच्छ।
Go to the other side.

अन्तर् आगच्छ/अभ्यन्तरम् आगच्छ ।
Come in.

एकदेशं गच्छ/एकदेशे भव/पार्श्वं गच्छ ।
Move to one side.

वेषं परिवर्तय।
Change your dress.

सम्यक् उपविश।
Sit properly.

आवर्तस्व।
Turn around.

वामतः चल।
Keep to the left.

धारास्नानं कुरु।
Take a shower.

इदं पुस्तकं पटले स्थापय।
Put this book on the table.

एतत् पुस्तनिधाये स्थापय।
Put it in the bookshelf.

पुस्तकं धाये स्थापय।
Put the book in the cupboard.

क्रीडनकं यथास्थानं स्थापय।
Put the toy back in its place.

निजस्योतं गृहाण।
Pick up your bag.

एतत् तस्मै/तस्यै देहि।
Give this to him/her.



यानं प्रविश्य आसनपट्टीं बधान।
Get into the car and tie the seat-belt.

पोटलीम् उत्थापय।
Pick up the bundle.

याने स्थापय।
Put it in the car.

अपरम् आनय।
Bring another.

निजसेवकं मम गृहं प्रेषय ।
Send your servant to my house.

मदर्थम् उत्तमं पुस्तकं प्रेषय।
Send me an excellent book.

तं दूरभाषय/तं दूरभाषेण वद।
Telephone him.

द्वारे शब्दापय/खटखटायस्व।
Knock at the door.

अस्य द्वितकम् आनय।
Bring its duplicate.

कृपया नीरवं पठ।
Read silently please.

किञ्चित् अपसर/उत्सर कृपया।
Please move a little.

दन्तान् मार्जय।
Brush your teeth.

शालास्योतं सज्जीकुरु।
Arrange your school bag.

द्वारम् उद्घाट्य शीघ्रं रोधय/रुन्धि।
Open the door and close it quickly.

उष्णवस्त्रं धारय।
Put on your warm clothing.

द्वारम् उद्घाटय।
Open the door.

द्वारं संवर।
Close the door.

शीघ्रं सज्जो/सज्जा भव।
Get ready quickly.

हस्तौ क्षालय।
Wash your hands.

मम हस्तं धर।
Hold my hand.

प्रतीक्षस्व। एषः/एषा आगच्छामि/आयामि ।
Wait. I am just coming.



भद्रं वर्तस्व/व्यवहर।
Behave yourself.

तस्य परिहासं शृणु।
Listen to his joke.

मुखं संवर।
Shut your mouth/Shut up.

निजचिन्तां कुरु/स्वव्यापारं चिन्तय/स्वकार्यं कुरु।
Mind your own business.

कृपया उपविश/आस्यतां कृपया।
Sit down please.

बहिर् गच्छ।
Get out/Go out.

मां शीघ्रं दूरभाषेण सूचय/मां शीघ्रं दूरभाषय।
Ring me up soon.

शीघ्रं स्वस्थो/स्वस्था भव।
Get well soon.

कृपया मां मुञ्च।
Please leave me.

किम् इच्छसि इति कथय।
Tell me what you want.

कृपया मम स्थानं रक्ष।
Please keep my place.

यवनिकां पातय/पटम् आक्षिप।
Drop/draw the curtain.

वीजनं रोधय/रुध्यताम्।
Switch off the fan.

दूरदर्शनं चालय।
Switch on the T.V.

दीपं निर्वापय/आलोकम् अपाकुरु।
Switch off the light.

तापनीं रोधय/तापनी रुध्यताम्।
Turn off the heater.

कोषिकां प्रतिदेहि।
Give back the cassette.

गमनात् पूर्वं धायं तालकय।
Lock the cupboard before going.

उत्तिष्ठ। समयो जातः।
Get up. It is time.

कृपया मां द्वयारोहं नय।
Please take me doubles.

कृपया गमनसमये मां जागरय।
Please wake me up when you go.

शीघ्रम्, त्वरस्व।
Quick, hurry up.

कृपया मम द्विचक्र-कुञ्चीम् अर्पय।
Please pass my cycle key.

कृपया पानिलमितं जलम् आनय।
Please bring me a glass of water.

त्वरस्व। अहं त्वां प्रतीक्षे ।
Hurry up. I am waiting for you.

DON'TS

मा वद।
Don't talk.

निरर्थकं मा वद।
Don't talk rubbish/uselessly.

उच्चैर् मा वद।
Don't talk loudly.

मूढवत् मा वद।
Don't talk like a fool.

मा क्रन्द।
Don't cry.

कोलाहलं मा कुरु।
Don't make noise.

एतत्/तत् मा कुरु।
Don't do this/that.

कोपं मा कुरु।
Don't be angry.

मां मा कोपय।
Don't enrage me.

भयं मा कुरु।
Don't fear.

अव्यापारे व्यापारं मा कुरु।
Don't poke your nose.

हस्तक्षेपं मा कुरु।
Don't interfere.

आटोपं मा कुरु/आत्मानं मा दर्शय ।
Don't show off.

उपहासं मा कुरु/मा उपहस ।
Don't mock.

लज्जां मा कुरु।
Don't feel shy.

समयनाशं मा कुरु/समयं मा नाशय।
Don't waste time.

स्वास्थ्यं मा नाशय।
Don't spoil your health.

एतत् सर्वं मा कुरु।
Don't do all this.

उत्क्रोशं मा कुरु/मा क्रोश।
Don't scream.

चीत्कारं मा कुरु।
Don't shout.



व्यग्रो/व्यग्रा मा भव।
Don't be nervous.

मा वञ्चय/छलय।
Don't cheat .

हठं मा कुरु।
Don't be obstinate.

चाटुं मा कुरु।
Don't flatter.

चिन्तां मा कुरु।
Don't worry.

मूढो/मूढा मा भव।
Don't be silly.

चापलं मा कुरु।
Don't be naughty.

मां मा क्षोभय/उद्वेजय।
Don't irritate me.

मनसि मा कुरु।
Don't mind.

मा विक्षिप/मा बाधस्व।
Don't disturb.

मा हस।
Don't laugh.

दन्तान् मा दर्शय।
Don't show your teeth.

सन्देहं मा कुरु/मा सन्दिहान।
Don't doubt.

मा उपहस।
Don't tease.

जलं मा नाशय।
Don't waste water.

जनान् मा मूर्खय।
Don't fool people.

कुक्कुरवत् मा भष।
Don't bark like a dog.

एतत् सर्वं मा लिख।
Don't write all this.

मां मा निरूपय/मां निर्निमेषं मा पश्य।
Don't stare at me.

तथा मां मा पश्य।
Don't look at me like that.

बालिकावत् माचर।
Don't act like a girl.

पटले पादं मा रक्ष/धेहि/स्थापय।
Don't put your leg on the table.

उपधिं मा दोलय/उपधौ मा दोलायस्व।
Don't rock your chair.

समस्यया ग्रस्तो/ग्रस्ता मा भव।
Don't hatch over the problem.

इदम् अन्यथा मा गृहाण/चिन्तय।
Don't take it otherwise.

माम् अन्यथा मा गृहाण/चिन्तय।
Don't misunderstand me.

तत्र वारंवारं मा गच्छ।
Don't go there again and again.

मां मा मुञ्च, दृढं धर।
Don't leave me, hold tight.

इदं जलं मा पिब।
Don't drink this water.

शीतवायुं न प्रवेशय।
Don't let the cool air come in.

रिक्तोदरे इदम् औषधं मा सेवस्व।
Don't take this medicine on an empty stomach.

विलम्बं मा कुरु/मा विलम्बस्व।
Don't delay.

तं/तां मा बाधस्व।
Don't trouble him/her.

MISCELLANEOUS

किं जातम् ?
What happened?

न किमपि।
Nothing.

अलम्।
Enough.

अवश्यम्।
Of course.

किं बहुना ?
What more?

दुर्भाग्यम् !
Bad luck !

लज्जाकरम् ।
Shameful.

सावधानम् !
Careful !

उत्तमः कल्पः।
Excellent idea.

साधुविचारः।
Good idea.

आश्चर्यम् !
Wonderfu !

विचित्रम् !
Strange !

उत्तमम्।
Excellent.

साधु।
Good.

अतीव साधु।
Very good.

साधु कृतम्।
Well done.

सम्यग् उक्तम्/साधु कथितम्।
Well said.

रम्यं/रमणीयं दिनम्।
Lovely day.

श्वस्तन-दर्शनाय।
See you tomorrow.

सुस्वप्नाः/सुनिद्रा।
Sweet dreams/sound sleep.

कीदृक् मारात्मक-विचारः !
What a deadly idea !

अवगतम् ?
Understood?

अस्य कोऽर्थः ?
What does it mean?

क्षम्यताम्।
Please excuse.

पुनर्दर्शनाय।
Good-bye.

किमत्र चित्रम् ?
What is strange here?

का हानिः ?
What is the harm?

अचिर-दर्शनाय।
See you soon.

हे भगवन् !
O God !

वराकः/वराकी।
Poor thing.

स्थूल/स्थूले ! अपेहि।
Fatty ! Get out.

नष्टो/नष्टा भव।
Get lost.

क्षणमेकं/पलमेकं कृपया।
Just a minute, please !

कीदृक् भयङ्कर-शब्दः !
What a terrible noise !

मारात्मकः सः ।
He is murderous.

वस्तुतः महनीयम् एतत्।
It is really great.

नैवम् ?
Isn't it ?

अद्भुतम् !
Fantastic !

न तत् तथा/नैतत् तथा।
It is not so.

न वाच्यम्/किमत्र वाच्यम् ?
No mention.

बहिर् गतः/गता।
Gone out.

तन्न चलिष्यति।
That won't do.

म्रियस्व।
Go to hell.

मूढ, जड, निर्बोध !
Fool, idiot, stupid !

मारात्मिका सा।
She is murderous.

सः शण्डः/दुर्बलशूरः।
He is a bully.

सापेक्षमिदम् ।
It depends.

अतीव अरतिकरम्।
Terribly boring.

एतत् सर्वं तव/भवतः/भवत्याः।
It is all yours.

अलं हासेन।
Stop laughing.

अधुनापि नागतः/नागता।
Not yet come.

तन्न भविष्यति।
That won't be.

यः सः (Hindi जो वह) m.

यः अर्जुनः स एव पार्थः। यः अर्जुनः स एव कौन्तेयः। यः भीमः स एव वृकोदरः। यः भीष्मः स एव पितामहः। यः कृष्णः स एव केशवः/जनार्दनः/माधवः/मधुसूदनः/योगेश्वरः। स एव पण्डितः यः शोकं मोहं च त्यजति। स एव पण्डितः यः शोकस्य (दुःखस्य) मोहस्य च त्यागं करोति। यः कर्मफलं त्यजति सः शान्तिं लभते। यः कर्मफलं त्यजति सः शान्तिलाभं करोति। स एव बन्धुः यः विपदि/सङ्कटे साहाय्यं करोति।

या सा f.

या सीता सा एव जानकी। या गङ्गा सा एव जाह्नवी। या तव भगिनी सा अस्य छात्रा। या तस्य भगिनी सा मम मातुलस्य पुत्री।

यत् तत् n.

त्वं यत् इच्छसि तत् अहं न इच्छामि। सः यत् वदति तत् त्वं लिख। त्वं यत् पठसि तत् सम्यक् स्मर। मया यत् दत्तं तत् मह्यं न प्रतिदेहि। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्। यत् इह (अस्मिन् महाभारतनामके महाकाव्ये) अस्ति तत् अन्यत्र अस्ति। यत् इह (अस्मिन् महाभारते) न अस्ति तत् क्वचिदपि (कुत्रापि) नास्ति।

कोऽपि (Hindi कोई) m.

कोऽपि अस्य प्रश्नस्य उत्तरं दातुं शक्नोति ? तत्र कोऽपि अस्ति ? न हि, अत्र कोऽपि नास्ति। मम कोऽपि भ्राता नास्ति। अस्ति कोऽपि देवः यस्य मुखं गजवत्। किं युष्मासु कोऽपि तस्य नाम जानाति ?

युष्मासु – amongst you.

कापि (Hindi कोई) f.

अस्ति कापि देवी या विद्यां ददाति। अपि तां जानासि ? मम कापि चिन्ता नास्ति। मम कापि भगिनी नास्ति।

किमपि (Hindi कुछ) n.

सः किमपि न जानाति। अद्य अहं किमपि विशेषं कथयितुम् इच्छामि।

TENSES AND MOODS

Make sentences:

[1]अहम् अस्मि I am. अहम् आसम् I was. अहं भविष्यामि I shall be.

अत्र, अन्यत्र, निकटे, दूरे, दुःखी, दुःखिनी, सुखी, सुखिनी, छात्रः, छात्रा, शिक्षकः, शिक्षिका, गायकः, गायिका।

त्वम् असि You are. त्वम् आसीः You were. त्वं भविष्यसि You will be.

अत्र, अन्यत्र, निकटे, दूरे, दुःखी, दुःखिनी, सुखी, सुखिनी, छात्रः, छात्रा, शिक्षकः, शिक्षिका, गायकः, गायिका।

सः/सा/एषः बालकः/एषा बालिका/भवान्/भवती अस्ति/आसीत्/भविष्यति।

अत्र, अन्यत्र, निकटे, दूरे, दुःखी, दुःखिनी, सुखी, सुखिनी, छात्रः, छात्रा, शिक्षकः, शिक्षिका, गायकः, गायिका।

[1] The declensions of अस्मद् (first person) and युष्मद् (second person) are identical throughout for all genders, e.g., अहं बालकः, अहं बालिका, अहं मित्रम्। त्वं बालकः, त्वं बालिका, त्वं मित्रम्।

अहं वदामि I speak. अहं वदितुम् इच्छामि I want to speak.
अहम् अवदम् I spoke. अहं वदिष्यामि I will speak.

सत्यम्, असत्यम्, न, कदापि, कुत्रापि, संस्कृतम्, शुद्धम्, अशुद्धम्, गृहे, विद्यालये, अपि, कदाचित्, सर्वदा, उचितम् ।

सः/सा जानाति he/she knows.

सः/सा ज्ञातुम् इच्छति he/she wants to know. सः/सा ज्ञास्यति he/she will know. सः/सा अजानात् he/she knew.

न, किमपि, बहु, अधिकम्, अल्पम्, अधुना, सर्वम्, तत्, एतत्।

एषः/एषा पश्यति।

एषः/एषा द्रष्टुम् इच्छति wants to see, द्रक्ष्यति will see, अपश्यत् saw. दक्षिणतः, वामतः, पुरतः, पृष्ठतः, ऊर्ध्वम्, अधः, दूरम्।

भवान्/भवती गच्छति।

कथम्, कदा, कस्मिन् समये, कतिवादने, शीघ्रम्, मन्दं मन्दम्। भवान्/भवती गन्तुम् इच्छति, गमिष्यति, अगच्छत्।

एषः बालकः खादति this boy eats.

एकवारम्, द्विवारम्, त्रिवारम्, चतुर्वारम्, पञ्चवारम्, बहुवारम्। एषः बालकः खादितुम् इच्छति, खादिष्यति, अखादत्।

एषा बालिका हसति this girl laughs.

उच्चैः, मधुरम्, सलज्जम्, कुटिलम्, विमलम्, प्रच्छन्नम्।

त्वं पठसि you read.

किमर्थम्, साधु, शुद्धम्, अशुद्धम्, किम्। त्वं पठितुम् इच्छसि ?

भविष्यत्	*अतीतः*	*तुम्*	*त्वा*	*त*
अर्पयिष्यति	आर्पयत्	अर्पयितुम्	अर्पयित्वा[1]	अर्पित[2]
कथयिष्यति	अकथयत्	कथयितुम्	कथयित्वा	कथित
स्मारयिष्यति	अस्मारयत्	स्मारयितुम्	स्मारयित्वा	स्मारित
गणयिष्यति	अगणयत्	गणयितुम्	गणयित्वा	गणित
क्रन्दिष्यति	अक्रन्दत्	क्रन्दितुम्	क्रन्दित्वा	क्रन्दित

Change the following into the above forms, e.g.,

खेल – खेलिष्यति, अखेलत्, खेलितुम्, खेलित्वा, खेलित।
आनन्दय – आनन्दयिष्यति, आनन्दयत्, आनन्दयितुम्, आनन्दयित्वा, आनन्दित । एवमेव –

क्रीड	खाद	चल	चिन्तय	चोरय
जनय	जीव	ज्वल	ताडय	दण्डय
दर्शय	धारय	धाव	नाशय	निन्द
पठ	पाठय	पत	पातय	पीडय
पूजय	पूरय	क्षालय	बोधय	भ्रम
मापय	मारय	मार्जय	मिश्रय	याच
रक्ष	रचय	शिक्षय	श्रावय	सज्जय
सूचय	स्थापय	हस	हासय	हारय

[1] अर्पयित्वा having offered. (Hindi अर्पण करके)

[2] अर्पित has been offered.

भविष्यत्	*अतीतः*	*तुम्*	*त्वा/य*[1]	*त*
अनुसरिष्यति	अन्वसरत्[2]	अनुसर्तुम्	अनुसृत्य	अनुसृत
अपसरिष्यति	अपासरत्	अपसर्तुम्	अपसृत्य	अपसृत
अपसारयिष्यति	अपासारयत्	अपसारयितुम्	अपसार्य	अपसारित
करिष्यति	अकरोत्	कर्तुम्	कृत्वा	कृत
अनुकरिष्यति	अन्वकरोत्	अनुकर्तुम्	अनुकृत्य	अनुकृत
उपकरिष्यति	उपाकरोत्	उपकर्तुम्	उपकृत्य	उपकृत
स्मरिष्यति	अस्मरत्	स्मर्तुम्	स्मृत्वा	स्मृत
विस्मरिष्यति	व्यस्मरत्	विस्मर्तुम्	विस्मृत्य	विस्मृत
हरिष्यति	अहरत्	हर्तुम्	हृत्वा	हृत
उपहरिष्यति	उपाहरत्	उपहर्तुम्	उपहृत्य	उपहृत
धरिष्यति	अधरत्	धर्तुम्	धृत्वा	धृत
संवरिष्यति	समवरत्	संवरितुम्	संवृत्य	संवृत
तरिष्यति	अतरत्	तरितुम्	*तीर्त्वा*	*तीर्ण*
अवतरिष्यति	अवातरत्	अवतरितुम्	अवतीर्य	अवतीर्ण
वितरिष्यति	व्यतरत्	वितरितुम्	वितीर्य	वितीर्ण
उत्तरयिष्यति	उदतरयत्	उत्तरयितुम्	उत्तीर्य	उत्तीर्ण
प्रेरयिष्यति	प्रैरयत्	प्रेरयितुम्	प्रेर्य्य	प्रेरित
त्यक्ष्यति	अत्यजत्	त्यक्तुम्	त्यक्त्वा	त्यक्त
प्रक्ष्यति	अपृच्छत्	प्रष्टुम्	पृष्ट्वा	पृष्ट

[1] य is used in place of त्वा when the root has a prefix, e.g., सृ–सृत्वा, अनु-सृ–अनुसृत्य। कृ–कृत्वा, अनु-कृ–अनुकृत्य। हृ–हृत्वा, अप-हृ–अपहृत्य।

[2] अ of the past tense is placed before the verb, not before the prefix, e.g., अनु+असरत्=अन्वसरत्। अप+असरत्=अपासरत्।

प्रवक्ष्यति	प्रावहत्	*प्रवोढुम्*	*प्रोह्य*	*प्रौढ*
आक्रक्ष्यति	आकर्षत्	आक्रष्टुम्	आकृष्य	आकृष्ट
आरोक्ष्यति	आरोहत्	आरोढुम्	आरुह्य	आरूढ
आदेक्ष्यति	आदिशत्	आदेष्टुम्	आदिश्य	आदिष्ट
उपदेक्ष्यति	उपादिशत्	उपदेष्टुम्	उपदिश्य	उपदिष्ट
उपवेक्ष्यति	उपाविशत्	उपवेष्टुम्	उपविश्य	उपविष्ट
प्रवेक्ष्यति	प्राविशत्	प्रवेष्टुम्	प्रविश्य	प्रविष्ट
स्नेक्ष्यति	अस्निह्यत्	स्नेहितुम्	स्नेहित्वा	*स्निग्ध*
क्रेष्यति	अक्रीणात्	क्रेतुम्	क्रीत्वा	क्रीत
विक्रेष्यति	व्यक्रीणात्	विक्रेतुम्	विक्रीय	विक्रीत
क्षेप्स्यति	अक्षिपत्	क्षेप्तुम्	क्षिप्त्वा	क्षिप्त
जेष्यति	अजयत्	जेतुम्	जित्वा	जित
नेष्यति	अनयत्	नेतुम्	नीत्वा	नीत
आनेष्यति	आनयत्	आनेतुम्	आनीय	आनीत
अभिनेष्यति	अभ्यनयत्	अभिनेतुम्	अभिनीय	अभिनीत
लेखिष्यति	अलिखत्	लेखितुम्	लिखित्वा	लिखित
एषिष्यति	ऐच्छत्	एष्टुम्	इष्ट्वा	इष्ट
प्रेषयिष्यति	प्रैषयत्	प्रेषयितुम्	प्रेष्य	प्रेषित
श्रोष्यति	अशृणोत्	श्रोतुम्	श्रुत्वा	श्रुत
गमिष्यति	अगच्छत्	गन्तुम्	गत्वा	गत
आगमिष्यति	आगच्छत्	आगन्तुम्	आगत्य	आगत
निर्गमिष्यति	निरगच्छत्	निर्गन्तुम्	निर्गत्य	निर्गत
नंस्यति	अनमत्	नन्तुम्	नत्वा	नत
ग्रहीष्यति	अगृह्णात्	ग्रहीतुम्	गृहीत्वा	गृहीत

आह्वास्यति	आह्वयत्	आह्वातुम्	आहूय	आहूत
स्थास्यति	अतिष्ठत्	स्थातुम्	स्थित्वा	स्थित
उत्थास्यति	उदतिष्ठत्	उत्थातुम्	उत्थाय	उत्थित
गास्यति	अगायत्	गातुम्	गीत्वा	गीत
पास्यति	अपिबत्	पातुम्	पीत्वा	पीत
दास्यति	अददात्	दातुम्	दत्त्वा	दत्त
ज्ञास्यति	अजानात्	ज्ञातुम्	ज्ञात्वा	ज्ञात
प्राप्स्यति	प्राप्नोत्	प्राप्तुम्	प्राप्य	प्राप्त
नोत्स्यति	अनुदत्	नोत्तुम्	नुत्त्वा	नुत्त
वत्स्यति	अवसत्	वस्तुम्	*उषित्वा*	*उषित*
नर्तिष्यति	अनृत्यत्	नर्तितुम्	नर्तित्वा	नर्तित
द्रक्ष्यति	अपश्यत्	द्रष्टुम्	दृष्ट्वा	दृष्ट
स्प्रक्ष्यति	अस्पृशत्	स्प्रष्टुम्	स्पृष्ट्वा	स्पृष्ट
पारयिष्यति	अपारयत्	पारयितुम्	पारयित्वा	पारित
आनन्दिष्यति	आनन्दत्	आनन्दितुम्	आनन्द्य	आनन्दित
आरोपयिष्यति	आरोपयत्	आरोपयितुम्	आरोप्य	आरोपित
उत्थापयिष्यति	उदथापयत्	उत्थापयितुम्	उत्थाप्य	उत्थापित
उद्घाटयिष्यति	उदघाटयत्	उद्घाटयितुम्	उद्घाट्य	उद्घाटित
प्रकाशयिष्यति	प्राकाशयत्	प्रकाशयितुम्	प्रकाश्य	प्रकाशित
वदिष्यति	अवदत्	वदितुम्	*उदित्वा*	*उदित*
भविष्यति	अभवत्	भवितुम्	भूत्वा	भूत
अनुभविष्यति	अन्वभवत्	अनुभवितुम्	अनुभूय	अनुभूत
बोधिष्यति	अबोधत्	बोद्धुम्	बुद्ध्वा	बुद्ध

आज्ञार्थकम्	*स्वीकारात्मकम्*	*आज्ञार्थकम्*	*स्वीकारात्मकम्*
आगम्यताम्[1]	आगच्छामि	गम्यताम्	गच्छामि
उपविश्यताम्	उपविशामि	उत्थीयताम्	उत्तिष्ठामि
दीयताम्	ददामि	गृह्यताम्	गृह्णामि
कथ्यताम्	कथयामि	श्रूयताम्	शृणोमि
चल्यताम्	चलामि	विरम्यताम्	विरमामि
खाद्यताम्	खादामि	पीयताम्	पिबामि
आनीयताम्	आनयामि	नीयताम्	नयामि
अपस्रियताम्	अपसरामि	अपसार्यताम्	अपसारयामि
क्रियताम्	करोमि	उद्यताम्	वदामि
उद्घाट्यताम्	उद्घाटयामि	संव्रियताम्	संवरामि
दर्श्यताम्	दर्शयामि	दृश्यताम्	पश्यामि
पठ्यताम्	पठामि	लिख्यताम्	लिखामि
पाठ्यताम्	पाठयामि	लेख्यताम्	लेखयामि
उत्थाप्यताम्	उत्थापयामि	त्यज्यताम्	त्यजामि
ज्वाल्यताम्	ज्वालयामि	निर्वाप्यताम्	निर्वापयामि

[1] This is used in the passive voice. Hence the subject is त्वया, भवता, भवत्या etc. and not त्वम्, भवान्, भवती etc. In the active voice with the subject भवान्, भवती, सः, सा, एषः बालकः, एषा बालिका the verbs are as follows –

आगच्छतु गच्छतु, उपविशतु उत्तिष्ठतु, ददातु गृह्णातु, कथयतु शृणोतु, चलतु विरमतु, खादतु पिबतु, आनयतु नयतु, अपसरतु अपसारयतु, करोतु वदतु, उद्घाटयतु संवरतु, दर्शयतु पश्यतु, पठतु लिखतु, पाठयतु लेखयतु, उत्थापयतु त्यजतु, ज्वालयतु निर्वापयतु, गायतु श्रावयतु, स्थापयतु तिष्ठतु, सम्मार्जयतु प्रक्षालयतु, पृच्छतु क्षाम्यतु।

गीयताम्	गायामि	श्राव्यताम्	श्रावयामि
स्थाप्यताम्	स्थापयामि	स्थीयताम्	तिष्ठामि
सम्मार्ज्यताम्	सम्मार्जयामि	प्रक्षाल्यताम्	प्रक्षालयामि
पृच्छ्यताम्	पृच्छामि	क्षम्यताम्	क्षाम्यामि

Translate into Sanskrit :

1. I will tell you later. 2. He will go to Bhubaneswar next month. 3. I will not go to school next Monday. 4. She will not go for picnic this year. 5. He will be a doctor soon. 6. I will build a house in this town next year. 7. He will go to the cinema in the evening. 8. Her son will get admission in the Ashram school next year. 9. You will be cured by the Mother's Grace. 10. Will you go home? 11. I will meet you later. 12. He will get the first prize again this year. 13. She will continue her studies even after her marriage. 14. I will go to Germany for higher studies.

उत्तरम् – १. अहं त्वां परं वदिष्यामि। २. सः आगामिमासे भुवनेश्वरं गमिष्यति। ३. अहम् आगामि-सोमवारे विद्यालयं न गमिष्यामि। ४. सा अस्मिन् वर्षे विहारिकायै न गमिष्यति। ५. सः अचिरं चिकित्सकः भविष्यति। ६. अहम् आगामिवर्षे अस्मिन् नगरे गृहं निर्मास्यामि/ गृहनिर्माणं करिष्यामि। ७. सः सायं चलचित्रं द्रष्टुं गमिष्यति। ८. आगामि-वर्षे तस्याः पुत्रः आश्रमविद्यालये प्रवेशं प्राप्स्यति। ९. त्वं मातृकृपया स्वस्थः/नीरोगः (स्वस्था/नीरोगा) भविष्यसि। १०. अपि त्वं गृहं गमिष्यसि ? ११. त्वां परं द्रक्ष्यामि। १२. अस्मिन् वर्षे सः पुनः प्रथम-पुरस्कारं प्राप्स्यति। १३. विवाहात् परमपि सा अध्ययनम् अनुवर्तयिष्यति। १४. अहम् उच्चतर-अध्ययनाय शार्मण्यदेशं गमिष्यामि।

Translate into Sanskrit :

1. I saw this boy in the Ashram at 7.15 P.M. 2. In which place did he find this? 3. A tiger from this forest entered that village last night. 4. He gave a book to my friend. 5. From where did this boy bring this fruit? 6. In this way he got money. 7. I went to the garden to bring flowers. 8. I was in this Ashram last year. 9. When did she take her breakfast? 10. Today morning I saw an accident near my house. 11. Yesterday was her birthday. 12. He got his Ph.D. Degree last year. 13. I saw a photo exhibition yesterday. 14. She told me to do this work. 15. He was an engineer. 16. Yesterday he did not come in time. 17. There was no rain last Friday.

उत्तरम् – १. सायं सपाद-सप्तवादने अहम् इमं बालकम् आश्रमे अपश्यम्। २. कस्मिन् स्थाने तेन इदं प्राप्तम् ? ३. गतरात्रौ अस्मात् जङ्गलात् कोऽपि व्याघ्रः तं ग्रामं प्राविशत्। ४. तेन मम मित्राय/बन्धवे पुस्तकं दत्तम्। ५. अनेन बालकेन इदं फलं कुतः आनीतम् ? ६. इत्थं सः धनं प्राप्नोत्/इत्थं तेन धनं प्राप्तम्। ७. अहं पुष्पाणि आनेतुम् उद्यानम् अगच्छम्। ८. गतवर्षे अहम् अस्मिन् आश्रमे आसम्। ९. कदा सा प्रातराशम् अकरोत् ? १०. अद्य प्रातः स्वगृहस्य निकटे मया एका दुर्घटना दृष्टा। ११. ह्यः तस्याः जन्मदिनम् आसीत्। १२. गतवर्षे तेन विद्यावारिधिः इति उपाधिः प्राप्तः। १३. ह्यः मया भाचित्र-प्रदर्शनी दृष्टा। १४. इदं कार्यं कुरु इति सा माम् अकथयत्। १५. सः अभियन्ता आसीत्। १६. ह्यः सः समयेन न आगतः। १७. गतशुक्रवारे वृष्टिः न अभवत्।

Use तुम् in the following sentences, e.g., अहं पठामि – अहं पठितुम् इच्छामि।

अहं खादामि। अहं जलं पिबामि। सा संस्कृतं पठति। एषः गृहं गच्छति। अहं किञ्चित् पृच्छामि। सः शृणोति। एषा खेलति। सः लिखति। अहं वदामि। त्वं किं करोषि ? अहं ददामि। सा दर्शयति। अहं स्नानं करोमि।

उत्तरम् – अहं खादितुम् इच्छामि। अहं जलं पातुम् इच्छामि। सा संस्कृतं पठितुम् इच्छति। एषः गृहं गन्तुम् इच्छति। अहं किञ्चित् प्रष्टुम् इच्छामि। सः श्रोतुम् इच्छति। एषा खेलितुम् इच्छति। सः लेखितुम् इच्छति। अहं वदितुम् इच्छामि। त्वं किं कर्तुम् इच्छसि ? अहं दातुम् इच्छामि। सा दर्शयितुम् इच्छति। अहं स्नानं कर्तुम् इच्छामि।

Translate into Sanskrit :

1. I want to go home. 2. He is going to buy a book. 3. She wants to see a film. 4. I come here to learn Sanskrit. 5. You can do this. 6. He wants something to drink. 7. I want to talk with you. 8. He comes to Ashram daily for meditation. 9. She wants to start a Sanskrit class here. 10. He is going to congratulate her. 11. Now you are able to answer.

उत्तरम् – १. अहं गृहं गन्तुम् इच्छामि। २. सः पुस्तकं क्रेतुम् गच्छति। ३. सा चलचित्रं द्रष्टुम् इच्छति। ४. अहम् अत्र संस्कृतं पठितुम् आगच्छामि। ५. त्वम् एतत् कर्तुं शक्नोषि। ६. सः किमपि पातुम् इच्छति। ७. अहं त्वया सह आलापं कर्तुम् इच्छामि/अहं त्वया सह आलपितुम् इच्छामि। ८. सः प्रतिदिनं ध्यानं कर्तुम् आश्रमम्

आगच्छति। ९. सा अत्र संस्कृतवर्गस्य आरम्भं कर्तुम् इच्छति/सा अत्र संस्कृतवर्गम् आरब्धुम् इच्छति। १०. सः तस्याः अभिनन्दनं कर्तुं गच्छति/सः ताम् अभिनन्दितुं गच्छति। ११. अधुना त्वम् उत्तरं दातुं शक्नोषि/अधुना त्वम् उत्तरयितुं शक्नोषि।

Use शक्नोमि or न शक्नोमि (I can or I cannot) in the above sentences, e.g., अहम् एकलः/एकला सर्वं खादितुं शक्नोमि। अहम् एकलः/एकला गृहं गन्तुं शक्नोमि। अहम् एतावत् जलम् एकलः/एकला पातुं शक्नोमि।

Join the following sentences by त्वा, e.g., अहं पूर्वं विद्यालयं गच्छामि, परं संस्कृतं पठामि – अहं विद्यालयं गत्वा संस्कृतं पठामि।

१. अहं विद्यालये पठामि, चतुर्वादने गृहम् आगच्छामि। २. अहं गृहम् आगच्छामि, खादामि। ३. अहं खादामि, खेलितुम् गच्छामि। ४. सा मन्दिरं गच्छति, पूजां करोति। ५. अहं प्रातः स्नानं करोमि, आश्रमं गच्छामि। ६. गोविन्दः शिक्षकं पश्यति, नमस्करोति। ७. शिष्यः गुरुं प्रणमति, गृहं गच्छति। ८. सः हस्तं प्रक्षालयति, भोजनं करोति। ९. एषः अधिकोषात् धनम् आनयति, आपणं गच्छति। १०. सः रसगोलं प्राप्नोति, आनन्देन खादति।

उत्तरम् – १. अहं विद्यालये पठित्वा चतुर्वादने गृहम् आगच्छामि। २. अहं गृहम् आगत्य खादामि। ३. अहं खादित्वा खेलितुं गच्छामि। ४. सा मन्दिरं गत्वा पूजां करोति। ५. अहं प्रातः स्नानं कृत्वा आश्रमं गच्छामि। ६. गोविन्दः शिक्षकं दृष्ट्वा नमस्करोति। ७. शिष्यः गुरुं प्रणम्य गृहं गच्छति। ८. सः हस्तं प्रक्षाल्य भोजनं करोति। ९. एषः अधिकोषात् धनम् आनीय आपणं गच्छति। १०. सः रसगोलं प्राप्य आनन्देन खादति।

अधिकोषः – bank. आपणः – shop.

I

एषः/एषा आयामि/आगच्छामि।
I am just coming.

अद्य मम तरणम् अस्ति।
I have swimming today.

अहम् आश्रमं गच्छामि।
I am going to the Ashram.

अहं श्रवालोकं द्रष्टुं गच्छामि।
I am going to see a video.

अहं शीतम् अनुभवामि।
I am feeling cold.

अहं पत्रमेकं प्रतीक्षे।
I am expecting a letter.

मम मातुलस्य दशा शोचनीया।
My uncle is in a serious condition.

अहम् अतीव क्षुधितः/क्षुधिता।
I am feeling very hungry.

अहो, अद्य मया अत्यधिकं खादितम्।
Oh, I have eaten too much today.

अलम्। मम उदरं पूर्णम्।
Enough. I am full.

मम विलम्बो जायते/भवति।
I am getting late.

पश्यानि तत्।
Let me see that.

अहम् अल्पाहाराय गच्छामि।
I am going to have my tiffin.

निद्रालुः अस्मि।
I am feeling sleepy.

मम मस्तकव्यथा भवति।
I have a headache.

यद् भावि तद् भवतु, अहम् एतत् कर्तुं गच्छामि ।
Come what may, I am going to do this.

अहं ज्वरितः/ज्वरिता।
I have fever.

अद्य अहं विलम्बेन उत्थितः/उत्थिता।
Today I got up late.

अहं सर्वयानं धर्तुं न शक्तः/शक्ता/न अशकम् ।
I could not catch the bus.

एतत् मया पूर्णतया विस्मृतम्।
I have forgotten it completely.

तद् अहं न गणये।
I do not care for it.

अतीव क्लान्तोऽहम्/क्लान्ताहम्।
I am too tired.

त्वामेव अन्वेषयामि स्म।
It is you I was looking for.

अहम् एतत् प्राप्तुम् इच्छामि।
I would like to have it.

अद्य अत्यधिकम् आलस्यम् अनुभवामि।
I am feeling extremely lazy today.

मम आपत्तिः नास्ति।
I have no objection.

मया तुभ्यं किमपि कथनीयम्।
I have something to tell you.

यदा कदापि अहं सज्जः/सज्जा ।
I am ready any time.

अत्रैव कुत्रापि अस्ति। तद् अन्वेषयानि।
It is somewhere here. Let me search for it.

अहं कमपि/कामपि स्मरामि।
I am remembering someone.

मम मस्तकं घूर्णते।
I feel giddy.

अद्य मम भीषणा शीतबाधा/भीषणः प्रतिश्यायः।
Today I have a bad cold.

अहं शीतबाधितः/शीतबाधिता।
I have caught a cold.

द्वारे खटखटाशब्दं शृणोमि/कोऽपि द्वारे शब्दापयति।
I hear someone knocking at the door.

मम दन्तव्यथा/दन्तपीडा भवति।
I have a toothache.

भोजने इच्छा/रुचिः न भवति।
I don't feel like eating.

अहं न जानामि। अहम् अत्र परदेशीयः/परदेशीया।
I don't know. I am a stranger here.

अहं प्रतिदिनं चतुर्वादने उत्तिष्ठामि।
I get up everyday at 4 o'clock.

अहं प्रथमं शौचालयं गच्छामि, तत्परं दन्तमार्जनं कृत्वा धारास्नानं करोमि।
I go to the toilet first, brush my teeth, and then have a shower.

अर्धहोरया अहं सज्जः/सज्जा भवामि।
I take half an hour to get ready.

पुनर्दर्शनाय सन्ध्याकाले।
See you again in the evening.

यथा कथयामि तथा किमर्थं न करोषि ?
Why are you not doing as I tell you?

अहं त्वां दण्डयिष्यामि यतः त्वया एतत् कृतम्।
Because you have done this, I will punish you.

अहं तस्य भ्रातरम् अवदं यतो हि सः तत्र न आसीत्।
As he was not there, I spoke to his brother.

अहम् एतत् करोमि यतः एतद् वरयामि।
I do it because I choose to.

अहं स्वप्रतिज्ञां पालयामि।
I keep my promise.

अहम् एतत् स्वयं करिष्यामि।
I will do it myself.

अहम् एकदा त्वां तत्र नेष्यामि।
I will take you there one day.

अहं दुग्धं न इच्छामि। अहं दधि इच्छामि।
I do not want milk. I want curd.

यदि त्वरां न कुर्याम्/त्वरां न कुर्यां चेत्, विलम्बितः/विलम्बिता स्याम्।
I shall be late unless I hurry.

CONCERNING STUDIES

मम लेखनी न लिखति/चलति।
My pen is not working.

मम गृहाभ्यासः न समाप्तः।
I have not finished my homework.

हन्त, सञ्चिकां न प्राप्नोमि।
Ah, I cannot find my notebook.

कृपया उद्घर्षणम् अर्पय ।
Please pass the eraser.

तव उद्घर्षणं गृह्णीयाम् ?
May I take your eraser?

मया बहुगृहाभ्यासः कर्तव्यः।
I have to do a lot of homework.

गणिते/गणितस्य गृहाभ्यासः अस्ति किम् ?
Is there any homework for maths?

तव अङ्कनीं गृह्णामि।
I am taking your pencil.

एषः गृहाभ्यासः।
Here is the homework.

अधुना भवान्/भवती शोधयितुम् अर्हति/शक्नोति ।
You can correct it now.

कृपया मया सह पुस्तकं पठतु।
Please read the book with me.

किम् एषा साधुलेखनी नास्ति ?
Isn't it a nice pen?

गृहाभ्यासः कर्तव्यः इति मया विस्मृतम्।
I have forgotten to do my homework.

तेनाहं दुःखितः/दुःखिता।
I am sorry for it.

मम कविताभ्यासः अधुनापि अवशिष्टः।
I have still to learn my poem.

अयं गृहाभ्यासः मया समापनीयः।
I have to finish this homework.

अहो, सुन्दरम् उद्धरणम् !
What a nice quotation it is !

स्मरसि न वा – अद्य तव सङ्गीतवर्गः सार्धषड्वादने।
Do you remember – you have singing class at 6.30 P.M.

कीदृक् अरतिकरः आसीत् स वर्गः !
What a boring class it was !

कालोऽयं वर्गं गन्तुम्।
It is time for the class.

अहम् एतद् बोद्धुं न शक्नोमि।
I cannot understand it.

मह्यम् अतीव रुचितम्। तद् अद्भुतम् आसीत्।
I liked it a lot. It was marvellous.

एतद् मया सम्पूर्णं विस्मृतम् आसीत्।
I had forgotten all about it.

मौनं/तूष्णीं कृपया।
Silence please.

कृपया पुनर् बोधय/बोधयतु। मया न अवगतम्।
Please explain again. I did not understand.

कदा वर्गः समाप्स्यते ?
When is the class going to finish?

तव का समस्या ?
What is your problem?

कृपया बोद्धुं यतस्व।
Please try to understand.

वस्तुतः अरतिकरम् इदम्।
It is really boring.

मम मस्तिष्कं न चलति/कार्यं न करोति। मम बुद्धिः न प्रवर्तते।
My brain is not working.

एषः गृहाभ्यासः अतीव सरलः/कठिनः/दीर्घः/लघुः।
This homework is quite easy/difficult/long/short.

कृपया कृष्णफलकं मार्जय।
Please wipe the blackboard.

एषः सङ्गीतस्य आरम्भसमयः।
It is time for the music to start.

कृपया निजलेखनीं देहि।
Please give me your pen.

पञ्चमान्तरे तव कः वर्गः ?
What class do you have in the fifth period?

तव उत्तरम् अशुद्धम्।
Your answer is wrong.

अवधेयम्/टिप्पणीम् अङ्कय/लिख।
Take the notes.

अद्य त्वं विलम्बितः/विलम्बिता।
You are late today.

क्षम्यताम्, अहं विलम्बितः/विलम्बिता।
Sorry, I am late.

शालागमने विलम्बः भवति।
It is getting late for the school.

श्लोकानां पुनरावृत्तिं कुर्याम।
Let us revise the slokas.

प्रवेशं प्रार्थये/इच्छामि।
May I come in?

आर्य/आर्ये, प्रविशानि ?
May I come in Sir/Madam?

आर्य/आर्ये, बहिर्गच्छानि ?
May I go out Sir/Madam?

अत्र उपविशानि ?
May I sit here?

तेन मम प्रश्नस्य अशुद्धम् उत्तरं दत्तम्।
He gave a wrong answer to my question.

सज्जो भव/सज्जा भव। कालोऽयं विद्यालयस्य।
Get ready, it is time for the school.

मम परीक्षा आसन्ना/आसीदति।
My exam. is drawing near.

अहं नवमश्रेण्याम् अस्मि। आगामिवर्षे दशमश्रेण्यां भविष्यामि।
I am in Class IX. I will be in Class X next year.

अहं शिशुविहारात् संस्कृतं पठामि।
I have been learning Sanskrit since my Kindergarten.

संस्कृते सर्वोच्चान्/उच्चतमान् अङ्कान् प्राप्नोमि। किन्तु गणिते अहं दुर्बलः/दुर्बला।
I get highest marks in Sanskrit. But I am weak in maths.

कठिनश्रमं कुरु इति मम शिक्षकः उपदिशति।
My teacher advises me to work hard.

अहं रसायन-शास्त्रे साधुः।
I am good at chemistry.

केन रङ्गेण लिखेयम् ?
What colour will I write with?

अस्य शब्दस्य वर्तनीं कथय।
Spell this word.

त्वया मम लेखन्या किं कृतम् ? एषा/इयं न लिखति।
What have you done to my pen? It does not write.

YOU

यत्र इच्छसि तत्र उपविश।
You may sit wherever you like.

यथेच्छसि तथा कुरु।
Do as you like.

यथा ते रोचते/यथा तव इष्टम्/यथा तव इच्छा।
As you like.

कृपया मम साहाय्यं कुरु/करोतु।
कृपया मम सहायः/सहाया भव/भवतु।
Please help me.

तव/भवतः/भवत्याः साहाय्यं प्रार्थये।
Could you help me?

अपि आयासि/आगच्छसि ?
Are you coming?

मम आगमनपर्यन्तं तिष्ठसि/प्रतीक्षां करोषि किम् ?
अपि प्रतीक्षसे मम आगमनं यावत् ?
Will you wait till I come?

तद् वक्तुं कथं दुःसहसे/दुःसाहसं करोषि ?
How dare you say that?

अद्य चारु दृश्यसे।
You look smart today.

किं जातं तव ?
What is the matter with you?

अपि त्वं न स्वस्थः/स्वस्था ?
Are you not well?

यदि त्वम् अत्यधिकं खादसि तर्हि रुग्णः/अस्वस्थः/रुग्णा/अस्वस्था भविष्यसि।
If you eat too much, you will be ill.

तव केशविन्यासः अपूर्वः।
Your hair-style is great.

किञ्चित्कालाय द्विचक्रं दातुं शक्नोषि ?
Can you lend your cycle for sometime?

मत्तोऽसि किम्/मत्तासि किम् ?
Are you mad?

किं तव वयः ?
How old are you?

त्वं क्लान्तः/क्लान्ता दृश्यसे।
You look tired.

कियत् रम्यः/रम्या दृश्यसे !
How pretty you look !

किं मयि कुपितोऽसि/कुपितासि ?
Are you angry with me?

अपि त्वं प्रकृतिस्थः/प्रकृतिस्था ?
Are you in your senses?

कथय, कदा मया आगन्तव्यम् ।
Tell me when I should come.

त्वया मध्याह्नभोजनं कृतं न वा ?
Have you taken your lunch or not?

अपि स्मरसि ?
Do you remember?

कति इच्छसि ?
How many do you want?

अपि त्वं सावकाशः/सावकाशा/मुक्तः/मुक्ता ?
Are you free?

अपि तव घटी आकाशवाण्याः समयेन संवदति ?
Does your watch keep Radio time?

प्रतिरूप्यं कति ददासि ?
How many do you give for a rupee?

सम्पूर्णं स्विन्नोऽसि/स्विन्नासि।
You have perspired all over.

इदं कार्यं कियत् शीघ्रं समाप्तुं शक्नोषि/समाप्नुयाः ?
How soon can you finish this job?

इदं कार्यं कियता कालेन समाप्स्यसि ?
How long would you take to finish this work?

कृपया मां गृहं नेतुं शक्नोषि ?
Would you please give me a lift to my home?

इदं पत्रं प्रेषालये निक्षेप्तुं शक्नोषि ?
Could you post this letter at the Post Office?

तव दूरभाषः उपयोक्तुं/व्यवहर्तुं शक्यते ?
Can I use your phone?

न करोषि चेत् वरम्।
It is better if you don't.

अविलम्बम् उत्तरं प्रेषय/कृपया प्रत्यावर्ति-प्रेषया उत्तरं देहि ।
Please reply without delay by the return post.

त्वं ज्वरितः/ज्वरिता।
You are running a temperature.

कः तव चिकित्सां करोति ?
Who is treating you?

त्वं कदा उत्तिष्ठसि ?
When do you get up?

प्रतिदिनं विद्यालयं कथं गच्छसि – पादचारेण वा द्विचक्रेण वा ?
How do you go to school everyday – on foot or by cycle?

त्वं कुत्रत्यः/कुत्रत्या ?
Where do you come from?

त्वं कस्यां श्रेण्यां पठसि ?
What class are you studying in?

सत्यं वदसि चेत् तव कापि हानिः न भविष्यति।
No harm will come to you if you tell the truth.

कुत्र तव निवासः ?
Where do you stay?

किं खादसि – रोटिकां वा भक्तं वा ?
What do you eat – bread or rice?

गत्वा भोजनं कुरु।
Go and take your food.

सङ्कोचं मा कुरु।
Don't feel shy, feel at home.

तव चायः शीतलः भवति।
Your tea is getting cold.

त्वं मां सङ्कटे पातयसि।
You are putting me into trouble.

MISCELLANEOUS

किमिदम्/इदं किम्/एतत् किम् ?
What is this?

कोऽयम्/अयं कः/एषः कः ?
Who is this (boy/man)?

का इयम्/इयं का/एषा का ?
Who is this (girl/lady)?

अस्ति कश्चिद् वाग्विशेषः/अस्ति किमपि विशेष-वक्तव्यम् ?
Is there anything special to say?

अस्ति किमपि विशेषम्/अस्ति कोऽपि विशेषः ?
Is there anything special?

अधुना कः समयः/का वेला/कतिवादनम् ?
What is the time now?

कृपया तद् देहि/ददातु।
Please give that.

क्षणं प्रतीक्ष्यताम्।
Please wait a moment.

इदं परमार्थेन न ग्राह्यम्।
This should not be taken seriously.

नास्ति अन्या गतिः/नास्ति अन्यः उपायः।
There is no other way.

चिकित्सालयं प्रति कः मार्गः ?
What is the way to the hospital?

त्वम् अत्र कथम् ?
How are you here?

इयद्-दिनानि कुत्र आसीः ?
Where were you all these days?

किम् आगमन-प्रयोजनम् ?
What is the purpose of your visit?

किं कारणम् ?
What is the reason?

भोजनं सिद्धम्/सज्जम्।
Food is ready.

अद्य अतीव उष्णम्/शीतम्।
It is too hot/cold today.

तथा शीतम् अद्य !
It is so cold today !

अत्यधिकम् उष्णं/शीतं खलु।
It is very hot/cold indeed.

अद्य कः दिनाङ्कः/अद्यतन-दिनाङ्कः कः ?
What is the date today?

अस्मिन् शनिवारे किं चलचित्रम् ?
What film is there this Saturday?

अद्य मध्याह्न-भोजने किं किं दीयते ?
What is there for lunch today?

अद्य रात्रौ कः कार्यक्रमः ?
What is the programme tonight?

व्यर्थम्, अहं न गच्छामि।
Useless, I am not going.

अद्य आकाशः इयत् स्वच्छः/निरभ्रः !
The sky is so clear/cloudless today !

शुद्ध-पञ्चवादने सः मम कक्षं प्राविशत्।
Just at 5 o'clock he entered my room.

यथा सः चिन्तयति तथा सर्वदा न वदति।
He does not always speak as he thinks.

सः स्वपुस्तकम् आनीय पटले अस्थापयत्।
He brought his book and put it on the table.

अपि सिद्धः/सज्जः प्रातराशः ?
Is the breakfast ready?

भोजनं सुस्वादु आसीत्।
The food was delicious.

इदं स्वादहीनम्।
This is tasteless.

इदं सुस्वादु।
This is very tasty.

मनसि कृतम् ? क्षम्यताम्।
Felt bad? I am sorry/Excuse me.

न हानिः ।
It does not matter.

जनप्रवादं न गणयेः/गणय।
You should not care for what people say.

किं भवति ?
What is going on?

कः शीष्करोति/शीत्करोति ?
Who is whistling?

अत्यधिकम् एतत्।
It is too much.

वस्तुतः सुन्दरम् इदम्।
It is really nice.

सामान्यतः एवं घटते।
Normally it happens like this.

तस्मात् सः न आगतः।
Because of that he has not come.

धारावाहिकं सुन्दरम् आसीत्।
The serial was good.

अधुना वार्ताकालः/समाचारकालः। कालोऽयं समाचारस्य।
It is time for the news now.

मम पत्रम् अस्ति ?
Do I have any letter?

त्वं प्रेषालयं गतः/गता ?
Did you go to the Post Office?

न, अहं न गतः/गता।
No, I did not go.

अहो, हृदयस्पर्शि इदं सङ्गीतम्।
Oh, this song is really touching.

मातृकृपया सः रक्षितः/सा रक्षिता।
He/She was saved by the Mother's Grace.

कुतस्त्वं मम आसने उपविष्टः/उपविष्टा ?
Why have you occupied my seat?

सः अस्वस्थः। सा अस्वस्था।
He/She is sick.

तथा अन्धकारः अत्र !
It is so dark here !

अद्य तस्य स्वास्थ्यं वरतरम्।
His health is better today.

अधुनापि बहुसमयोऽस्ति।
Still there is a lot of time.

प्रतिदिनं मम घटी कलया द्रुता भवति।
My watch goes one minute fast everyday.

अधुना सः गृहे अस्ति ?
Is he at home now?

ह्यः अत्र धारासारैः वृष्टिः अभवत्।
Yesterday it rained cats and dogs here.

सा किमपि इच्छति स्म।
She was asking for something.

सूर्यः उदितः।
The sun is up.

अद्यतन-प्रेषया इदं पत्रम् आगतम्।
This letter has come by today's post.

अद्य केवलं रामः आगच्छति।
Only Rama is coming today.

इतः तत् स्थानं कियत् दूरम् ?
How far is that place from here?

इदं [सर्व]यानम् उषानगरीं गच्छति ?
Does this bus go to Auroville?

किं यानम् उषानगरीं गच्छति ?
Which bus goes to Auroville?

उषानगरीं प्रति यानभाटकं कियत् ?
What is the bus-fare to Auroville?

अयं मार्गः आश्रमं गच्छति।
This road goes to the Ashram.

अपि रात्रिभोजनम् आरब्धम् ?
Has the dinner started?

आपणः रुद्धः।
The shop is closed.

अयं पादपः पुष्पितः।
This plant has flowered.

किं सः मत्तः ?
Has he gone mad?

गीतमेकं गीयताम्। कृपया गीतमेकं गाय/गायतु।
Please sing a song.

किं गीतम् ?
What song?

किमपि।
Any.

तस्य अग्रजः आपणं चालयति ।
His elder brother is running a shop.

इदं चलचित्रम् अत्र सप्ताहत्रयम् अचलत्।
This film ran here for three weeks.

सः दक्षिणनेत्रेण सम्यक् द्रष्टुं न शक्नोति।
He can't see well with his right eye.

दूरदर्शने किं चलति/भवति ?
What is on the T.V.?

दासमहाशयेन सह तव/भवतः/भवत्याः कः सम्बन्धः ?
How are you related to Mr. Das?

विहारिका कथम् आसीत् ?
How was the picnic?

वितन्तुकं वाद्यते/चलति।
The radio is on.

दूरभाषः न चलति/कार्यं न करोति।
The telephone is dead.

तस्य पुत्रः विद्यालये कथं पठति ?
How is his son getting along at school?

अयं प्रसेवः तथा भारी यथा अहम् उत्थापयितुं न शक्नोमि।
This bag is so heavy that I cannot lift it.

अपि सः तत्र अस्ति ?
Is he there?

अपि त्वं क्रुद्धयसि मह्यम्/अपि त्वं मयि कुपितः/कुपिता ?
Are you angry with me?

त्वं किमर्थम् उच्चैः हससि ?
Why are you laughing loudly?

तुभ्यं कतिवारं कथनीयम् ? त्वां कतिवारं कथयेयम् ?
How many times should I tell you?

तेन/तया सह तव कः सम्बन्धः ?
How is he/she related to you?

त्वं किम् इच्छसि ?
What do you want?

कस्त्वाम् एतत् अकथयत् ?
Who told you this?

त्वं कति होराः कार्यं करोषि ?
How many hours do you work?

कुत्र यानं प्राप्तुं शक्यते/शक्नुयाम् ?
Where can I get a car?

अत्र किं किं स्थानं दर्शनयोग्यम् ?
What are the places worth visiting here?

त्वम् इदं कर्तुं शक्नोषि ?
Can you do this?

कः एतत् कर्तुं शक्नोति ?
Who can do this?

DECLENSION

Words ending in अ

In Sanskrit words ending in अ are the most common and they are inflected in the following way :

एषः श्यामः।	This is Shyam.
अहं श्यामं जानामि।	I know Shyam.
अहं श्यामेन सह आलपामि।	I am talking with Shyam.
अहं श्यामाय ददामि।	I give to Shyam.
अहं श्यामात् प्राप्नोमि।	I get from Shyam.
अहं श्यामस्य बन्धुः।	I am Shyam's friend.
अहं श्यामे विश्वासं करोमि।	I believe in Shyam.
हे श्याम ! अत्र आगच्छ।	O Shyam ! come here.

अयि गोपाल ! अपि जानासि ? रामचन्द्रस्य पुत्रः रमेशः विनायक-मन्दिरे विद्याधन-लाभाय गणेशं बाल्यकालात् पुष्पेण, धूपेन, मोदकेन पूजयति ।

कः पूजयति ? रमेशः पूजयति। रमेशः कः ? रमेशः रामचन्द्रस्य पुत्रः। रमेशः कं पूजयति ? रमेशः गणेशं पूजयति। रमेशः गणेशं कुत्र

(कस्मिन् स्थाने) पूजयति ? रमेशः गणेशं विनायक-मन्दिरे पूजयति। रमेशः गणेशं किमर्थं पूजयति ? रमेशः गणेशं विद्याधन-लाभाय पूजयति। रमेशः गणेशं कथं (केन द्रव्येण) पूजयति ? रमेशः गणेशं पुष्पेण, धूपेन, मोदकेन पूजयति। रमेशः गणेशं कस्मात् कालात् पूजयति ? रमेशः गणेशं बाल्यकालात् पूजयति।

अयि श्याम ! शृणु। अद्य मध्याह्ने गोपालस्य पुत्रः रामः क्षुधिताय शङ्कराय फलं दातुं गोविन्द-गृहस्य छादात् तव आम्रवृक्षं दण्डेन प्राहरत्।

कः प्राहरत् ? सः कस्य पुत्रः ? कः कं प्राहरत् ? कः कं केन प्राहरत् ? कः कस्मै किं दातुम् आम्रवृक्षं प्राहरत् ? कः कस्मात् स्थानात् कं प्राहरत् ? कः कदा कं प्राहरत् ?

उत्तरम् – रामः प्राहरत्। सः गोपालस्य पुत्रः। रामः आम्रवृक्षं प्राहरत्। रामः आम्रवृक्षं दण्डेन प्राहरत्। रामः क्षुधिताय शङ्कराय फलं दातुम् आम्रवृक्षं प्राहरत्। रामः गोविन्द-गृहस्य छादात् आम्रवृक्षं प्राहरत्। रामः मध्याह्ने आम्रवृक्षं प्राहरत्।

Translate into Sanskrit :

1. This is my hand. 2. This is my right hand. 3. I am holding my left hand with my right hand. 4. Do something for my injured left hand. 5. There is a chalk in my right hand. 6. See, the chalk is falling from my right hand. 7. You do not know the skill of my right hand. 8. O my dear hand, do not beat Shyam.

उत्तरम् – १. एषः मम हस्तः। २. एषः मम दक्षिणहस्तः। ३. अहं दक्षिणहस्तेन वामहस्तं धरामि। ४. मम आहत-वामहस्ताय किमपि कुरु। ५. मम दक्षिणहस्ते खटी अस्ति। ६. पश्य, मम दक्षिणहस्तात्

खटी पतति। ७. त्वं मम दक्षिणहस्तस्य कौशलं न जानासि। ८. हे मम प्रियहस्त ! श्यामं मा ताडय।

Words ending in आ

एषा गीता। अहं गीतां जानामि। अहं गीतया सह आलपामि। अहं गीतायै ददामि। अहं गीतायाः प्राप्नोमि। अहं गीतायाः बन्धुः। अहं गीतायां विश्वासं करोमि। हे गीते ! अत्र आगच्छ।

हे राधे ! तत्र पश्य। नृत्यकलायां निपुणा गीतायाः पुत्री नम्रता सीतया सह सङ्गीतशिक्षायै अतिथिशालायाः पाठशालां गच्छति।

का गच्छति ? नम्रता गच्छति। नम्रता का ? नम्रता गीतायाः पुत्री। गीता का ? गीता नम्रतायाः माता। नम्रता कुत्र गच्छति ? नम्रता पाठशालां गच्छति। नम्रता किमर्थं पाठशालां गच्छति ? नम्रता सङ्गीतशिक्षायै पाठशालां गच्छति। किं सा एकला पाठशालां गच्छति ? न, सा एकला न गच्छति। तर्हि सा केन सह गच्छति ? सा सीतया सह गच्छति। नम्रता कस्मात् स्थानात् कुत्र गच्छति ? नम्रता अतिथिशालायाः पाठशालां गच्छति। नम्रता कस्यां कलायां निपुणा ? नम्रता नृत्यकलायां निपुणा।

Translate into Sanskrit :

1. This is my nose. 2. I am holding the nose. 3. I smell with my nose. 4. Today the condition of my nose is serious. 5. There is a terrible flow from my nose. 6. But I need no medicine for the nose. 7. There is a lot of mucus in my nose. 8. O my nose! today you become all right.

उत्तरम् – १. एषा मम नासिका। २. अहं नासिकां धरामि। ३. अहं नासिकया जिघ्रामि। ४. अद्य मम नासिकायाः दशा शोचनीया। ५. मम नासिकायाः दुर्दम-स्रावः भवति। ६. किन्तु अहं नासिकायै औषधं न इच्छामि। ७. मम नासिकायां प्रचुर-सिङ्घाणम् अस्ति। ८. हे मम नासिके, अद्य त्वं स्वस्था भव।

Fill in the blanks using the words in brackets.

(क) अयोध्या (सरयूनदी) . . . तीरे अस्ति ।
(अयोध्या) . . . राजा दशरथः ।
(दशरथः) . . . चत्वारः पुत्राः सन्ति ।
(प्रथम) . . . नाम रामः ।
(द्वितीय) . . . नाम भरतः ।
(तृतीय) . . . नाम लक्ष्मणः (चतुर्थ) . . . च शत्रुघ्नः ।
रामः (कौशल्या) . . . पुत्रः ।
भरतः (कैकेयी) . . . पुत्रः ।
लक्ष्मणः शत्रुघ्नश्च (सुमित्रा) . . . पुत्रौ ।
रावणः (कुम्भकर्ण) . . . भ्राता ।

(ख) उग्रसेनः (मथुरा) . . . राजा ।
कंसः (उग्रसेन) . . . पुत्रः ।
देवकी (कंस) . . . भगिनी ।
कृष्णः (देवकी) . . . पुत्रः ।
वसुदेवः (देवकी) . . . पतिः, (कृष्ण) . . . पिता।
अर्जुनः (कुन्ती) . . . पुत्रः ।
सः (कृष्ण) . . . (भगिनी) . . . (सुभद्रा) . . . पतिः।
अभिमन्युः (सुभद्रा) . . . पुत्रः ।

सः (उत्तरा) . . . पतिः।
उत्तरा (विराड्राज) . . . पुत्री।

उत्तरम् –

(क) सरयूनद्याः, अयोध्यायाः, दशरथस्य, प्रथमस्य, द्वितीयस्य, तृतीयस्य, चतुर्थस्य, कौशल्यायाः, कैकेय्याः, सुमित्रायाः, कुम्भकर्णस्य।

(ख) मथुरायाः, उग्रसेनस्य, कंसस्य, देवक्याः, देवक्याः कृष्णस्य, कुन्त्याः, कृष्णस्य भगिन्याः सुभद्रायाः, सुभद्रायाः, उत्तरायाः, विराड्राजस्य।

PROVERBS

शुभस्य शीघ्रम्।
The sooner the better.

गतस्य शोचना नास्ति।
Let bygones be bygones.

फलेन परिचीयते।
A tree is known by its fruit.

जातस्य हि ध्रुवो मृत्युः।
All that is born must die.

बुभुक्षितः किं न करोति पापम्।
A hungry man knows no law.

शठे शाठ्यं समाचरेत्।
Tit for tat.

अति सर्वत्र वर्जयेत्।
Too much of anything is bad.

अङ्गारः शतधौतेन मलिनत्वं न मुञ्चति।
Black will take no other hue.

कीर्तिर्यस्य स जीवति।
Glory gives immortality.

कालस्य कुटिला गतिः।
Time runs in a devious way.

सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः।
Better give the wool than the whole skin.

अकाले नियमो नास्ति। अभावे स्वभावो नष्टः।
Necessity knows no law.

अतिपरिचयादवज्ञा।
Familiarity breeds contempt.

अतिभक्तिश्चोरलक्षणम्।
Too much courtesy, too much craft.

अल्पविद्या भयङ्करी।
A little learning is a dangerous thing.

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।
Mother and motherland are superior to heaven.

मुण्डे मुण्डे मतिर्भिन्ना।
Opinions differ.

भिन्नरुचिर्हि लोकः।
Tastes differ.

स्वभावो दुरतिक्रमः।
It is difficult to change one's nature.

परोपकारार्थमिदं शरीरम्।
This body is meant for doing good to others.

विद्या ददाति विनयम्।
Knowledge gives humility.

ज्ञानमेव शक्तिः।
Knowledge is power.

ज्ञानस्याभरणं क्षमा।
Forgiveness is an adornment of knowledge.

नानृतात् पातकं परम्।
There is no greater sin than falsehood.

नास्ति ज्ञानात् परं सुखम्।
Knowledge is the greatest happiness.

मौनिनः कलहो नास्ति।
The silent man has no quarrel.

शरीरमाद्यं खलु धर्मसाधनम्।
The body is the principal instrument for the realisation of Dharma.

अजीर्णे भोजनं विषम्।
Food taken in indigestion is poison.

अविद्याजीवनं शून्यम्।
Life is empty without knowledge.

क्रोधः संसारबन्धनम्।
Anger fetters the whole world.

क्षमातुल्यं तपो नास्ति।
There is no askesis like forgiveness.

धर्मक्षयकरः क्रोधः।
Anger destroys all virtue.

सर्वं सत्ये प्रतिष्ठितम्।
All is founded on Truth.

का विद्या कवितां विना!
What is knowledge without poetry !

रामो द्विर्नाभिभाषते।
Rama never speaks twice.

न मिथ्या ऋषिभाषितम्।
The words of a seer never prove false.

WHAT NEXT ?

For acquiring a more comprehensive ability to read, understand, write and speak Sanskrit, the following study-material is recommended:

- Speak Sanskrit the Easy Way
- सुरभारती द्वितीयो भागः
- सुरभारती तृतीयो भागः
- सुरभारती चतुर्थो भागः
- संस्कृतं भाषामहै
- सरलसंस्कृतसरणिः प्रथमो भागः
- सरलसंस्कृतसरणिः द्वितीयोऽन्तिमश्च भागः
- संस्कृतस्य व्यावहारिकस्वरूपम्

As is well known, practice is the most direct method of acquiring any skill. Therefore, after the foundation for mastering Sanskrit has been laid by the study recommended above, it should be followed up with regular and wide reading, frequent effort to express oneself in writing and conversation to the extent possible. Constant interaction with lovers of Sanskrit will be of great help.

The books *Speak Sanskrit* and *Surabharati* as well as other audio-video materials are available on the following website:

http://sanskrit.sriaurobindoashram.org.in

Other Sanskrit Books

सुरभारती, प्रथमो भागः	संस्कृत कैसे पढाऐं ?
बालश्लोकाः	आदर्शबालकः
रङ्गमञ्चे संस्कृतम्	कथासङ्ग्रहः
सरलश्लोकाः	सरसश्लोकाः
आलापमाला	सत्कथाः
रम्यनाटकानि	अर्घ्यम्
भारतस्य देवालयाः	गीतगुञ्जनम्
संक्षिप्तगीता	छन्दोऽलङ्कारपरिचयः
वेदप्रवेशः	कथाञ्जलिः
दुर्गास्तोत्रम्	पाणिनीयप्रवेशः
तमिळ्-संस्कृत-सम्बन्धः	व्यावहारिकं पाणिनीयम्
बालनाटकानि	पाणिनीयपद्धत्या शब्दरूपाणि
स्तोत्रसङ्गीतिका	श्रीअरविन्दोपनिषद्

लोकसंस्कृतम् (त्रैमासिकी पत्रिका)

(साम्प्रतं संयुक्ताङ्करूपेण वर्षे द्विवारं प्रकाश्यते)

वार्षिकशुल्कं रू. ३०.०० आजीवनम् रू. ५००.००

Available at

SABDA, Sri Aurobindo Ashram, Pondicherry 605002

Tel (0413) 2223328 Email mail@sabda.in

Send your order with full remittance through bank draft or money order. Books are sent only by registered post and not by V.P.P. Add on 5% of the total value of the books as well as Rs 30 towards postage and packing.

Books can also be ordered via the website http://www.sabda.in

The vital question is how we are to learn and make use of Sanskrit and the indigenous languages so as to get to the heart and intimate sense of our own culture and establish a vivid continuity between the still living power of our past and the yet uncreated power of our future.

Sri Aurobindo

ISBN 978-81-7058-512-1
Rs 50

